कोजातःश्मशानेसवमांसभुक्। लोलुपात्सनिधनंप्राप्तोदुःखात्तदिववक्रिना। दशमेसोनवद्व
धस्तीक्ष्णतुंडोनखायुधः।। प्रतिमांसवसाहारोरोगेननिधनंगतः। एकादशेपिचांडालोगर्सा तोवं
वरानने। द्रव्यसहरणार्थंवैविष्णाकिंकरवैरमनि। सदंडकोसिकेनैवप्राणावधस्तत्क्षणात्
आनीतोहिवधार्थाय। आनीतोहिवधार्थायतृप्तोग्नेश्चबलंबितः। तत्रैवलिंगमासन्नंसो थे
मूलेश्वरोन्नरः। तत्सहस्रिपथंप्राप्तसंमृतोविलिश्चेतसः।। क्षणेननिधनंप्राप्तसगतःस्त्रिदशालयं
तत्रेतुक्तावरान्भोगान्भुक्त्वतीर्थंविचूतले। जातःख्यातोविदर्भायांविश्वेशोनामपार्थिवो रामः
प्राप्तिस्मरत्वमापन्नोलिंगदर्शनपूर्वकः। उलनानूबुलुजेभोगान्प्राप्तराज्यंचकारसः। सो नि १०७
क्षिप्यसुतंराज्येविनातमितिधर्मवित्। संस्मरन्पूर्वदृष्टांतंजगामावंतिकांपुरीं। तत्रदृष्ट्वामहं

लिंगंदुर्दर्शमितितेजसा।। दिव्येनवृत्तुषापरपन्नं लिंगमध्येश्वरावरं। लिंगमध्येस्थितासर्वसि
द्धरासरितस्तथा। द्वीपाश्चपर्वताश्चैवतथावादिव्यधृतयः। संध्यासहनक्षत्रेणदित्यश्चा
ग्निनासह। धनदोवरुणश्चैवयमः शक्रोमरुत्पतिः। मरुतोदेवगंधर्वाऋषयस्तपोधनाः। ना
गापक्षापिशाचाश्चराक्षसानीमविक्रमाः ब्रह्मद्याद्देवतास्तत्रसंस्थादोलेवादरस्तथा। सर्वे
त्रिभुवनंदेवि लिंगमध्येविलोकितं।। प्रनावंतमालिंगमज्ञात्वासम्यक्रमहीपतिः। संयतः
पूजयामासविश्वेयोनिमहेश्वरं।। प्रसन्नश्चानवत्तस्मक्वनंवेदमब्रवीत्। वरंवरयभद्रंते।
किमनीप्सितंदद्मितेः।। तेनोक्तंक्वनंराज्ञायदितुष्टोसिमेप्रभो। यत्तापशुपतिमनुज्ञाःश्रद्धा
श्रद्धयाथवा।। मानृतेपापपतनेघोरेसंसारसागरे। किंश्वरोतिनाम्नावैश्रमिष्योनवत्
तले।। इत्युक्तवतनृपत्वयाविश्वेशालंकृतांगदः। विमानेनसुरैस्तन्मतोलोकंमदीयकं। गणो
नाविघ्नैःसार्द्धरक्ष्यमानावरानने। किरीटकुंडलीवैवमुक्ताहारविचूषितः। विमानेतस्य
तद्दिव्यपरिवस्तुसमंततः। समदेवेधनाध्यक्षानानानाकनिवासिनः। मुनयःसिद्धगंधर्वा
तथाप्सरसांगणाः। नृत्यंतिनामरनारीणांविलोकितविनोदिकं। युगकोटिसहस्रंतुमास

श्रीवेस्थितस्तत्रावंतीदेवसुविश्रुतौदेवौविश्वेश्वरःपरः॥ दृष्ट्वालिंगंचविश्वशंपातकैर्वि
मुच्यतेजन्मजन्मकृतैर्दहीमनोवाक्कायकर्मभिः॥ दृष्ट्वाविश्वेश्वरंलिंगंकृतकृत्यत्वमाप्नुत
वस्मनश्चतिदोषाग्निमलघ्नीनाशमेतिवा॥ श्रा॥ मोतिदहकामोघ्नसमाहमानमीसुरा॥ इ
त्यभव्याधयत्रूरग्रहभूताश्चदारुणाः॥ पुनश्चर्पतिवरारेविश्वेशंपूजितेसति॥ यकृच्चि
श्चयायुक्तोलिंगमाराधयेतिवै॥ तेसर्वकामसंपन्नाज्ञायंतेचपुनर्गुणा॥ अंतर्गतिश्च
सादिव्याजायतेमत्यसादतः॥ यत्रसंपूजतेलिंगंतस्मिन्देशेसुनाक्रियाः॥ नतत्रउल्लिख
यंनालमृत्युनयंकुचित्॥ अतयोनिवृतालनागानवदृष्टिणः॥ पुत्वविश्वेश्वरंलोकु
वेरदहनादयः॥ लिंगार्चनेनसंप्राप्तापरांसिद्धिमिहोजसा॥ एषतेकथितोदविप्रनाथ्पा
पनाशनः॥ विश्वेश्वरमदेवस्यकटेश्वरमतःशृणु॥ ॥इतिश्रीस्कंदपुराणेअवंतीखंडेवि राम
श्वेश्वरमाहात्म्यं॥ ॥चतुःपंचाशत्तमोध्यायः॥ शिवउवाच॥ कटेश्वरंप्रियेयस्यदर्शनमात्रेणकृत १०८
तोनरोनवेत्॥ सद्यकल्पपुरादेविराजावृत्रसंविक्रमः॥ सशत्रुनिर्जितःसंख्येकृतकोशा
तिदुःखितः॥ वनेजगामगहनमेकाकीश्रमकर्शितः॥ तत्राश्रमंददर्शाथवसिष्ठस्य

महात्मनः॥ सतेनर्षिवसिष्ठेनदृष्टमात्रःसभूपतिः॥ पूजितोविधिवदर्घ्यंराजार्हंचयथादरं॥
ज्ञात्वातपःप्रभावेनतत्पूर्वंशोकवंनृपं॥ पप्रच्छागमनंदेविकुशलंचपुनःपुनः॥ सनृपःकथ
यामासवसिष्ठायसदुःखितः॥ राज्यंचयत्कलंब्रह्मन्कृतंविद्विषिनिर्मम॥ त्वामहंशरणंप्राप्तो
दुःखैकायतनःकृतः॥ निष्कंटकंकथंराज्यंनविष्यतिपुनःप्रभो॥ उपदेशप्रदानेनप्रसादंकर्तुम
र्हसि॥ तस्यतद्वचनंश्रुत्वावसिष्ठोभगवान्ऋषिः॥ ध्यात्वोवाचकथयामासवज्रकोपदहनान्वितं।
महाकालवनंनृपव्रजत्वंकार्यसिद्धये॥ दिव्यानदीतत्रविश्रुतात्रुवनत्रये॥ तस्मात्तीरमु
पागम्यलिंगंपश्चुकेश्वरदक्षिणे॥ दृष्ट्वासिनृपशार्दूलतपस्तप्तंवतापसं॥ अस्मिन्वमावशेषंतुवीरव
ल्कलधारिणं॥ वस्वनात्मावसिष्ठस्यवसिष्ठस्यमहात्मनः॥ जगामसहसाराजामहाकालवनंमुनं
ददर्शतापसंतत्रहिरंजीविनमव्ययं॥ उपवासकृशंशांतंतत्रसादित्यवर्चसं॥ तापसेननृपोदृष्टो
मंत्रोयंममवत्सत्र॥ श्रामोराज्यपरिभ्रंशोज्ञात्वावचनमब्रवीत्॥ एह्येहिनृपशार्दूलदिष्ट्यापाप्तो
सिमांपतं॥ इत्युक्तातापसेनेवऊंकारश्चकृतस्तदा॥ ऊंकाराद्वेवपातालेनित्यावप्यंकन्यका॥
निर्ययुःकांचनंपीठमेकातासांपगृह्यवै॥ कंधरानुगृहीत्वान्यानिःसृताजलसंचृतांपादप्रक्षालना

र्थायतष्ठतीयासमुपस्थिता।अन्येद्येव्यजनेग्राह्यतत्पार्श्वेव्यवस्थिते॥ततोऽंकारमकरोत्पुनरेवम
हातपाः॥तेनऊंकारशब्देनदेवलोकात्समागतं।दृष्ट्वासरसांसंघंनृत्यगीतमनोहरं।अनंत
रंददर्शायलिंगंज्योतिःकरंपरं।उत्पन्नंयज्जगद्यस्मिल्लीयतेसचराचरं॥तद्दृष्ट्वाविस्मयोविष्टो भू
वनृपसत्तमः॥प्रणम्यशिरसाविप्रंकिमिदंद्विजसत्तम॥एवंपृष्टेनृपेणायमविप्रोवाक्यमब्रवी
त्॥सप्तजन्मानिराजेंद्रत्वयार्हंपरितोषितः॥अतस्तेदर्शितामायातपसाऽऽकरणात्तु॥लिंगस्या
स्यप्रभावेनपश्यमेतपसोबलं॥ऊंकारेणकृताष्टम्यांजलप्रणवितस्मरणात्॥ऊंकाराच्चजलंश्रेष्ठं
मुखादग्निरजायत।ऊंकारात्पृथिवीसर्वाजातावह्निमयातदा॥संहृत्यतत्स्मरणंवह्निर्मुखाद्वसू
विनिर्ययौ॥ऊंकारेणकृतंशून्यंतस्मरणादेवपार्वति॥नदिशःप्रदिशोवापिननक्षत्रग्रहास्तदा॥सृ
तोब्रह्मामतन्त्रालिस्तविष्णोर्विस्मयान्वितः॥चिंतयामाससहसाकालिंगंकंचतापसं॥एवंचि
तयतस्तस्यततोशब्दोमहाननूत्॥तस्माद्ब्रह्मसंजातंपुरंप्रोंकारसंहतं।सुहृन्मधेस्थायवनंवि
शालंसमुद्भवंजाह्नवदत्तचिंतंव॥दिव्यैर्जनैःसेवितमात्मविद्भिर्ददर्शराजासहसापुरंतत्॥भूयो
भवन्महान्शब्दस्तस्मात्स्त्रीयुगलंबभौ॥सितवस्त्रधरश्वेताकृष्णावस्त्रधरासिता।पुनःशब्दो ब्र

भूवाथतस्मात्पुरुषसत्तमः।द्विशिरःखण्डमुखश्चैवपादैर्वादनैर्युतः॥पुनःशब्दसंजज्ञेपुरुषःसप्त
धागतः॥संहृत्यंवपुनस्तब्धदर्शयित्वाद्विजेनतु॥श्लोकमित्थंविशालाक्षिजातंकरकिंतंनृपं।पश्य
लोकमिमंमह्यंतपसानिर्मितंमृधात्वत्प्रियायमहालोकोदर्शितस्तेनृपोत्तम॥एवमुक्तस्तदातेन
तापसेननृपोत्तमः।विस्मयापन्नहृदयःपप्रच्छपरयासुधिः॥भगवन्शिवलोकेकेस्त्रियोविजसत्त
म॥कोसोद्वादशपाद्विश्रद्विदेहःषट्शिरोपुनः।कस्यासोपुरुषोब्रह्मन्नयःपंकःसप्तधानवेत्
तस्यतत्कथनंश्रुत्वाकथयामासतापसः॥येतेस्त्रियोत्वयादृष्टासितकृष्णेनृपोत्तम॥तेराज्ञोनीलो
त्पलेब्रह्मणानिर्मितेपुरा।शीर्षद्वयंत्वयादृष्टंतेयनेत्रकीर्तिते।मुखानियानिदृष्टानिषट्चतस्रस्तव
स्मृताः॥पादाद्वादशयेदृष्टामासाद्वादशतेस्मृताः॥यःपुमान्सप्तधाजातएकीभूतोनरेश्वरः॥
समुद्भवःस्मृतिज्ञेयःसप्तधैकात्मवस्थितः।एतत्तावत्तरंवक्ष्येत्वत्प्रियार्थंवदर्शितं।एवंविदित्वा
राजेंद्रनशोकंकर्तुमर्हसि॥सर्वाविनश्वरोलोकाःसदेवासुरमानुषाः॥मयादृष्टोहिबभ्रुशोलिं
गस्यास्यप्रभावतः॥कुरुशत्रुविनाशायलिंगस्यास्यवदर्शनं।राजंनिःकंटकंराज्यंविष्यतिनसं
शयः॥एवमुक्तस्तदाराजादृष्ट्वालिंगमुत्तमं॥दर्शनात्तस्यलिंगस्यकंटकायेमहीभृतः॥विदेहेषिणो

मृतास्तेपिश्रुतास्तेनमहीवृत्तं॥ गतःसविषयंराजावक्त्रीबभूवह॥ लिंगस्यास्पश्नोवनरा
इत्वा महाधनं॥ यज्ञैश्चविविधैरिष्ट्वापुरंनिर्वाणमाप्तवान्॥ तापसैर्नश्रुतंसर्वंदृष्टंध्यानेनतत्तत
लब्धंनिःकरेराज्यंलिंगस्पास्पत्वदर्शनात्॥ नविष्यतिनसंदेहोदर्शनाज्ज्ञानदायकं॥ अद्यप्रभृ
तिपश्पतिदेवंकंटकेश्वरंशिवं॥ तेषांवकंटकासद्यो॥ विनश्पतिनसंशयः॥ नोमिषेवकुरुक्षेत्रंग
गाद्वारेवपुष्करे॥ स्नानात्संसेवनाद्वापियत्सुएवंनविष्यति॥ तत्सुरपन्नवतासमकृश्रीकंठेश्वर
दर्शनात्॥ गृहिणोलिंगिनोवापियेपश्पतियतव्रताः॥ देवंकंटेश्वरंनत्वातेषांसिद्धिर्नविष्यति
विषयासक्तचित्तोपितत्स्मरतिनरः॥ यः पश्पतिप्रसंगेनसोपिस्वर्गंगमिष्यति॥ जन्मांत
रसहस्रेणपापंसमुपार्जितं॥ तत्सर्वंयास्पतिक्षिप्रंकंटकेश्वरदर्शनात्॥ दर्शनंसंकृतंत्वेवं
तपस्तप्तंकृतंत्वयत्॥ ध्यानमध्ययनंचैवसर्वंनिवर्तिष्यतेक्षयं॥ एवंब्रुवाणंतंविप्रंतापसंसंशितव्र
तं॥ लिंगोनोक्तंविशालाक्षितुष्टेनवरदेवकं॥ जरारोगविनिर्मुक्तःसर्वरोगशोकविवर्जितः॥ न
ष्यसिगणाधक्षोवरदःसर्वदुर्जितः॥ त्र्यंबकस्यापिसर्वेषांयोगैश्वर्यसमन्वितः॥ एवमुक्तोथलिं रामः
गेनतापसोगणतांगतः॥ गणैःपरिवृतोदेविममपार्श्वमुपागतः॥ अंधकेनपुरायुद्धेसिंहनादो ११०
यदाश्रुतः॥ तदादेविमदीर्यंतुज्ञातंकंटकिंतंवपुः॥ उत्पन्नंवतदालिंगमशेषारिविनाशनं॥ देवा

नांकंटकायेचदत्त्वालिंगमिनायतः॥ अतःकंटेश्वरोदेवोविख्यातोभुवनत्रये॥ एषतेकथितो
देविपुनावःपापनाशनः॥ ॥ कंटेकेश्वरसंदेवसंस्मरणंसिद्धेश्वरंपरं॥ इतिश्रीस्कंदपुराणेअवंतीखं
डेकंटकेश्वरमाहात्म्ये॥ ॥ दरुवाच॥ एवंविधंविजानीहिपंचाशत्तममीश्वरं॥ सिद्धेश्वरंवरारोहे
महापापविनाशनं॥ सद्यकल्पेतयादेविमदर्थंहिमहत्तपः॥ कृतंनीलोत्पलापांगेनीषणंमे
तन्मते॥ तपसातवरोद्रेणदग्धंत्रिभुवनत्रयं॥ उद्धरंहितपोज्ञात्वाजगन्नाथश्चतुराननः॥ आगत्य
वावदेवेशोदेवित्वांपुनयागिरा॥ किंवत्रिप्रार्थकामासिकिमत्रंप्रदामितेविरम्यतांमति
र्लोकेशात्तपसोस्मान्ममाज्ञया॥ त्वयाचवचनंश्रुत्वागुरोर्गौरवगर्वितं॥ प्रियंतथ्यंहितंतत्रवर्णि
तंत्वांहितं॥ उत्सुकःसतदाब्रह्मा प्रणामानमयाप्रिये॥ तपसोद्धरादेवितपस्तेकंशिरेम
या॥ समांश्यामलवर्णांतुबकृशःप्रोक्तवान्नवः॥ श्यामाहंकावनाकारावलनेनवसंयुता॥ नत्वा
भूतपतिंदेवंकथंस्यादितिमेतपः॥ त्वदीयंवचनंश्रुत्वावरार्हंवरदःप्रभुः॥ एवंनविष्यतीसाद्ब्रह्मा
लोकपितामहः॥ कियतात्वेवकालेनवांछासिद्धिर्नविष्यति॥ गौरीनाम्नातुतेमूर्तिःकांत्यादीप्सा
नविष्यति॥ एतच्छ्रुत्वातयावाक्यंब्रह्मणःपरमेष्ठिनः॥ कृत्वातंगिरिजेसम्यंकालेनीलंनविष्यति
॥ ॥

एतच्छ्रुत्वा त्वयावाक्यंब्रह्मणः परमेष्ठिनः। क्रोधात्सिंहसमुद्भूतोवदनात्तेनयावहः॥ विदृता
स्योमहागंडोमदाजलिलकंधरः। प्रोद्भूतबल्लीगूलोनखयदोदंष्ट्रोत्कटः। तस्यास्यपतितुंदेवि
व्यवसायंकृतस्त्वया॥ सोपिसिंहस्तुधाविष्टस्त्वांभक्षयितुमुद्यतः। नवाद्यासोसमर्थोभूद्धी क्षितुं
वातपोधिकां॥ सदह्यमानस्तपसातेजसासहसातव। पारम्भुरवः समनवत्प्राणत्राणपरायणाः
ततस्त्वंवाभूत्कृपणासिंहंप्रतिपतंतते। क्षुधितस्त्वयातस्मात्तीरंसूमृतसंनिभं॥ उत्पादितंतव
नाम्नासुस्निग्धाम्नास्मतेजसा। त्वदंघिनखुरावारोदुष्टोदंपापविग्रहः। त्वामत्तुकामोदुष्टात्मा
त्वयाहंजनितोधुना। तस्माद्यास्यामिनरकंमातृहागुरुघातकः॥ तस्यतद्वचनंश्रुत्वाद्युखितस्
सुतस्यव। ममत्वेनविशालाक्षिसिंहस्यकथितंत्वया। अथघ्नंविद्यतेक्षेत्रंमहाकालवनंशुभं। त
त्रगच्छममादेशाद्धी मंदेवनिषेवितं॥ कंठेश्वरस्यदेवस्यसमीपेलिंगमुत्तमं। सिंहनादात्समुत्पन्नं
शंकरस्यमहात्मनः॥ अंधासुरस्ययुद्धेवैपीडितेवासवेपुरः। त्वदीयंवचनंश्रुत्वासिंहस्त्वरितरा
मः। गतोमहाकालवनंदृष्टोदेवोयतक्षणात्। दिव्यदेहोमृगारिरूपजातोलिंगस्यदर्शनात्॥ १११
श्वेतसिंहेश्वरोदेवोचुविख्यातोभविष्यति॥ एतस्मिन्नंतरेब्रह्मासंभ्रांतस्तवसुव्रते॥ उवाचवो

वृराहोहदेवैः परिरक्षतस्तदा। यएषसिंहसंभूतोतवक्रोधात्समुद्भवः। ततोसौवाहनेदेविन विष्म
तिनसंशयः॥ लिंगंसिंहेश्वरंनक्तंयः पश्यतिसमाधितः। तस्यवासोद्भवेदिव्योन विष्मतिकदा
चिदपि॥ कीर्तिनान्मुच्यतेपापाद्दृष्ट्वान्नरकाणिपश्यति। स्पर्शनात्तस्यलिंगस्यपुनात्यासप्तमंकुलं
मनसाचिंतितान्कामान्ददातीश्वरसन्निधौ। तदेवपुरुषोमुक्तोजन्मदुःखजरादिभिः
यदापश्यतिसिंहेशंसंसारार्णवतारकं॥ व्याघ्रव्यालादयस्तीरात्तथासाहसिकास्त्रयः। ते
सोमपंननवतिश्चसिंहेश्वरदर्शनात्॥ यज्ञानांतपसांवेदानादीनांसयत्फलं॥ तत्फलंजाय
तेसम्यक्कृदृष्ट्वासिंहेश्वरंशिवं॥ मदीयंलोकमाप्नोतिसुरासुरनमस्कृतं। यःपश्यतिप्रयत्नेन।
देवंसिंहेश्वरंसदा। इत्युक्तोपन्नगमाथब्रह्मलोकंस्वयंप्रिये॥ युद्धेषुस्तवसर्वस्मात्कालकोतिं
कलंकितं। पन्नावात्तपसस्तस्मैगौरवंपात्रमद्भुतं। एषतेकथितोदेविपन्नावैपापनाशनः॥ सिं
हेश्वरस्यदेवस्यरेवतेश्वरमतः शृणु॥ ॥इतिश्रीस्कंदपुराणेऽवंतीखंडेसिंहेश्वरमाहात्म्यं॥ हरुः॥
षड्रूपंवाशतमंविद्धिरेवतेश्वरसंज्ञिकं। यस्यदर्शनमात्रेणपूर्णसिद्धिःप्रजायते। अमहंतीपुरा
संज्ञारवेस्तेजोतिदुःखितं॥ तपःकर्तुगतादेविज्ञात्वासूर्येणसंज्ञते। अश्वरूपंततोकृत्वाजगा

मायोत्तरान्कुरून्॥ ददर्शोत्तरसंज्ञांवृक्षान्सुधारिणः॥ गतासासन्मुखंतस्यपुरश्चक्षणात्पुरा
तनात्॥ स्वनासिकापोगंतयोस्तत्रसमेतयोः॥ नासत्यदस्रोतनयावश्ववक्त्रौविनिर्गतौ॥ रेवतो
सांतरेरेवंतरवक्षीवमंतनुत्रधृक्॥ अश्वास्तूर्णंसमुद्भूतोबाणतूणधनुर्धरः॥ तेनैवजातमात्रेण
नाश्वारूढेवलीलया॥ निर्जित्यत्रिजगद्वीरंसदेवासुरमानुषं॥ ततोदेवापराभूताः शस्त्रास्त्रांशु
रणंगताः॥ प्रणम्यकथयामासुरयंकंपितकंधराः॥ अस्माकंवनयंतेजोरविपुत्रेणनाशितं
रेवतेनसुरेंद्रेणसृष्टलोकपितामह॥ तस्मगात्रसमुद्भूतोवह्निर्धवितिकालजित्॥ ज्वलंति
पादपास्तेनपतंतिशिखराणिच॥ सर्वतोव्याकुलीभूतंहाहाकारमचेतनं॥ तेनैवपीडितं
सर्वज्वालामालासमाकुलं॥ दशदिक्षुप्रवृत्तोयंमृत्योर्व्यादनवादनः॥ सर्वंकिंकुर्मकाशंत्रज्व
लद्दृश्यतेप्रभो॥ इतितेपिवचः श्रुत्वाब्रह्मणोक्तंवरानने॥ ज्ञातंमयासुरश्रेष्ठमनुवर्तांकार्यमीदृ
शं॥ ब्रूतिष्यंतिवचःसार्थंकांक्षितोवःसुरोत्तमाः॥ गच्छध्वंसदनंतस्माच्छंकरंशरणंसुराः॥ ब्रह्म॰
स्तूयतांवचनंश्रुत्वामर्मांतिकमुपागताः॥ त्रिदशानूचुरस्मत्रस्नानलामिदमब्रुवन्॥ त्रादिसर्व ११२
नयेनैवरेवंतेनमहेश्वरः॥ दग्धंत्रिभुवनंसर्वं शरीरोत्थेनवह्निना॥ तेजसामहतासैव विक्रमे

णबलेनच॥ अस्माध्यंकिलसोस्माकंसर्वेषांदेवसत्तमः॥ भगवन्त्रभवात्मनामः शंकरकथ्य
न॥ त्वांप्रपद्यामहेसर्वेनिर्वृतंशरणार्थिनः॥ शरण्यंवरदंदेवंत्रिदशानांमहेश्वरं॥ मयास्मृतः
सूर्यपुत्रोरेवंतस्तत्क्षणात्प्रिये॥ प्राप्तप्राप्तःप्रसन्नात्मावचनंचेदमब्रवीत्॥ किंमयादेवकर्तव्यं
ब्रूहिसर्वमशेषतः॥ ततोमयासूर्यपुत्रउत्संगेचक्रतत्सदा॥ स्नेहादाबुवितोमूर्ध्निपरिष्वक्तःपुनः
पुनः॥ ददामितेमहाभागवरंवरयसुव्रत॥ परितुष्टोस्मितेकामंयथेष्टंकाममाशुहि॥ अय
माज्ञापयामित्वांश्रेयस्त्वेवमवाप्स्यसि॥ ममानीश्वरस्थानंविद्धितेरथिवीतलात्॥ अत्रसूर्यप्रलये
पुत्रमहाकालवनंशुभं॥ तत्रदास्यामितेस्थानंतत्रकीर्तिर्विष्यति॥ सर्वेकंटेश्वरस्यापिस्थानं
परमदुर्लभं॥ तत्रत्वंवसरेवंतलिंगंस्थापयिशाश्वतं॥ सर्वदात्रिदशैःपूज्यंनविष्यतिनसंशयः
गुह्यकाधिपतिस्तंत्वंस्वगलोकेनविष्यति॥ अश्वशालासुसर्वासुप्रजनीयोनविष्यति॥ नृप
तीनागृहेत्ववसिष्यतिसुरर्जितः॥ तेजोमदीयंस्थानंलिंगाकारंसनातनं॥ पूजयित्वात्रिदशेश्व
रंसेत्वंयत्नतस्तथा॥ एवमुक्तोमयादेविरेवंतोरविजस्तदा॥ जगामाकाशमाविश्यमहाका
लवनंक्षणात्॥ दर्शयित्वातल्लिंगंउमोतिसुप्रसन्नातनं॥ सूर्यपुत्रस्तुरेवंतोदृष्टोलिंगेनपार्वति

प्रोक्तः शृणुष्वैकाग्र्येण दिष्ट्याद्दृष्टोसिसूर्यज। अद्यप्रभृतितेनाहमारक्षातियास्यामिभूतले।स्नातंमत्समीपेतुसूर्यपुत्रत्रयासदा।अक्षयानविताकीर्त्तिर्दीयानुवनत्रये।रेवंतेश्वरसंज्ञोदृग्नविष्यामिनसंशयः॥येमांपश्यंतिरेवंतनत्वापरमयापुनः॥तेषामश्वानविष्यंतिविजयोमेप्रसूजित॥ऐश्वर्यदानशक्तिश्चपुत्रपौत्रमनंतकं॥गुह्यकानांपतिर्भूत्वास्वर्गलोकेभवत्यति लिंगमूवुवंशुलाप्रोक्तंवैरविसूनुना।रेवंतेनाविशालाक्षिसंतुष्टेनांतरात्मना।देहिमेह्यवर्नाभक्तिंदेहिमेस्थानमुत्तमं।देहिमेपरमंज्ञानंध्रुवाकीर्त्तिंदेहिमे।भगवन्भूतभव्येशभवबंधभयापहोसंस्तुताथोस्मिसंजातस्तवदेवस्यदर्शनात्।जन्मकोटिकृतंपापंक्षुधातृष्णेत्वापश्यंतिदेहिनः॥नतेषांपुनरावृत्तिर्घोरेसंसारसागरे।इत्युक्तारविसूनुनारेवंतोरविवल्लभः रेवंतेश्वरदेवस्यघंटेश्वरमृतं शृणु॥ ॥इतिश्रीस्कंदपुराणेऽवंतीखंडेरेवंतेश्वरमाहात्म्ये॥ ॥हरउवाचप्रपंचाशतंविविघंटेश्वरमथेश्वरं।यस्यदर्शनमात्रेणकाकाभावोनिश्चयोभवेत् घंटोनामगणश्रेष्ठोबभूवममवल्लभः।वासुदेवस्यमनोःकालेकीर्तकार्थंयदृच्छया।प्रस्थितोब्रह्मसदनंद्रष्टुंब्रह्माणमागतः।प्रवेशेपिनलभेतप्रासादाद्दूरतःस्थितः।एवंसचिंतयतस्त

रामः ११३

स्यात्रसंवत्सरोगतः॥घंटस्यब्रह्मणोद्वारिप्रवेशोदेविनालवत्॥निर्गच्छंतंमयालोक्यवीणाहस्तंसमुत्सुकोनारदंसगणश्रेष्ठःपप्रयोनिग्रहोदरात्।प्रोक्तंघंटेनसहसामोनिवेदयनारदागणोहतीवतत्वज्ञोमहादेवस्यवल्लभः॥दर्शनार्थंसमायातोब्रह्मणःपरमेष्ठिनः॥घंटस्यवचनंश्रुत्वाऋषीतेमानवन्मुनिः॥नारदःप्रसुवाचेदंसमाश्वासप्रकेतवं।अहंहसूतेःपार्श्वेषिनोस्मिगणाधिप।किंचित्कार्यंतिरंप्रष्टुंब्रह्मणालोककर्तृणा॥आयास्यामिक्षणेनेवतावत्कालंप्रतीक्षतां॥इत्युक्तानारदोदेविमंमपार्श्वमुपागतः॥वृत्तांतंकथयामासघंटस्यमुनिसत्तमः॥इदृशोद्भुतनोवृत्तोघंटेनसदृशःप्रभो।यस्त्वांसत्कारणोदेवसेवायेपरमेष्ठिनः॥स्थितःसंवत्सरंसाग्रंप्रवेशंनवलब्धवान्॥तच्छ्रुत्वाक्वनंतमुनारदस्यमुनेस्तदा॥मयातीवमहद्विब्रह्मन्कारिस्थितोविमन्॥पतितोभूतलेदेवोदेवदारुवनांतिकात्रात्मानंपतितंदृष्ट्वानोमोघंटेनपार्वति।प्रोक्तंशोकतरंगेववल्वनंगहृदांतरं॥सेवार्थंयातियोन्यत्रपरित्यस्यत्वकंचन।सयातिनरकंघोरमपकीर्तिंविंदति।नारदेनममत्वंचित्तमद्यगतं।तस्मात्त्वामीनमेब्रह्मन्नसेदेवामहेश्वरः।एवंविलपतस्तस्यनारदेमुनिसत्तमः।व्याजगामतमुद्देशंयत्रघंटोवसंस्थितः।दिव्यदारुवं

नेदे विदर्शनार्थंतपस्विनां। घंटेननारदोदृष्टोनीतेनाकुलतेजसा। अवस्वामीदर्शनंलत्वा किमन्यन्मे
करिष्यति॥ एवंतस्यवितथांतुनारदोवाक्यमब्रवीत्॥ गणाधक्षननेकार्यंमन्युर्पुण्यविनाशनं
कीर्त्यर्थंपतितोघंटप्रायश्चित्तार्थमब्रवीत्॥ प्रायश्चित्तविमुक्तात्मापुनर्जास्यसिशंकरं॥ तस्मा
ममादेशान्महाकालवनंव्रज॥ रेवतेश्वरसर्वंतुविद्यतेलिंगमुत्तमं॥ सर्वमेपत्कंदिव्यंचनाशा
स्यतिमेष्यति॥ इत्युक्तोनारदेनैवजगामघंटएवसः॥ तेनापिकथितंसर्वंसत्यमुक्तंमहामुने
नारदेनगणाधक्षकीर्त्तिघ्नंविनाशया॥ कश्यपेनमृकंडेनह्यत्रिणाचमहात्मना॥ अन्यैश्चमुनि
गणादेविलोमशेनसुरर्षिणा॥ प्रोक्तोघंटगतःशीघ्रंमहाकालवनंमुनं॥ यत्रघंटानिनादेनयुध्यते
ममसंयुगे॥ यापुत्तयक्षरंदेविसंभूतंलिंगमुत्तमं॥ दृष्टंतत्रगणेनैवलिंगंतेजोमयंमुनं॥ दर्शना
त्स्पर्शनात्पूजा घंटागणोभवेत्॥ लक्ष्मीकांसासमायुक्तः महस्रकिरणोरुतिः॥ घंटोभिनंदि।
तोत्यर्थविमानेसर्वकामिके॥ यास्यतिसुचिरंकालंममलोकंसनातनं॥ घंटेश्वरंपरंलिंगं॥ राम.
रूपेयंकस्पकात्रचित्॥ आधितोयदिवादीनोऽचितोवाभवन्नरः॥ यःपश्यंतिप्रसंगेनदेवंघंटे ११४
श्वरंप्रिये॥ दीप्तकांचनवर्णेनविमानेसर्वकामके॥ गंधर्वाप्सरसांमध्येस्वर्गमादित्यमानवः॥ २॥

स्तिताह्यनंतेकामान्वरीणावेणुविनोदितः॥ ततःस्वर्गात्परिभ्रष्टःसर्वैश्वर्यसमन्वितः॥ हिरण्यधान्य
संपूर्णेसंमृद्धेजायतेकुले॥ राजाराज्यतुल्योवाजंबूद्वीपपतिर्भवेत्॥ यःस्नात्वादेवस्प्रयागे।
श्वरमभ्यर्चयेत्॥ ॥ इतिश्रीस्कंदपुराणेअवंतीखंडेघंटेश्वरमाहात्म्यं॥ ॥ हरउवाच॥ प्रयागेश्वरमंतत्तु
सर्वकामप्रदंपरं॥ श्रुतंधिकंविजानीहिपृच्छावशात्ममीश्वर॥ आसीत्स्वयंभकल्पेतुमनुस्वायंभुवे
पुरा॥ तस्यप्रियव्रतःपुत्रोयज्वापरमधार्मिकः॥ सर्वेषुयज्ञेष्वग्नेर्यज्ञैःसमाप्तवरदक्षिणैः॥ सप्तद्वीपे
तुसंप्राप्यनरनादीन्सुतान्प्रियो॥ स्वयंविशालबदरीगत्वातेपेमहत्तपः॥ कालेनबहुनातत्र
नारदःसमुपास्थितः॥ विश्वजितोविश्वरामेणराज्ञाप्रियव्रतेनवै॥ सृष्टंसृजयिस्वातुकिमाश्च
र्यंवदस्वमे॥ इत्युक्तःकथयामासनारदोमुनिसत्तमः॥ श्रूयतांपेमयाराजन्कंप्राप्तंसरोवरे।
सावृष्टाविशालाह्रीकस्माद्वसिनिर्जने॥ कासिनवृक्षंवासिकिंवाकार्यंमहत्वया॥ कृत
श्चवारुसर्वांगितन्ममाचक्ष्वशोभने॥ एवमुक्तामयासाहिमांदृष्ट्वामीस्मितेक्षणा॥ स्मृत्वात्मं
स्मितायावतावन्मेज्ञानमुत्तमं॥ विस्मृतंसर्ववेदास्यसर्वंगस्त्रीविवेहि॥ ततोहंविस्मयोवि
ष्टश्चिंतामोहसमन्वितः॥ तामेवशरणंगत्वायावत्स्पर्शमिपार्थिवः॥ तावद्दिव्यःपुमांस्तस्मा।

शरीरेममदृश्यते॥तस्मात्पिंडोहृदयेद्वितीयस्तस्मात्तृतीयस्तृतीयस्तस्मात्पिंडोहृदयेद्वात्मृतृतीयस

सर्ववेदामयातदा॥ ज्ञानंषडंगसहितंशास्त्राणिविविधानिच॥ लब्ध्वाज्ञानेनराजेंद्रमयाज्ञो
क्तंक्वचत्पुरा॥ मयागेणसितोदेवोममज्ञानसत्कारणात्॥ प्रयागेश्वरसंज्ञंतुख्यातिंलोकेषुया
स्यति॥ तदाप्रभृतितस्त्रिगंतीर्थकोटिशतैर्वृतं॥ स्वर्गापवर्गफलदंतत्रत्वंगंतुमर्हसि॥ किमन्ये
नाश्वमेधेनदृष्टेनसनृपसत्तम॥ अश्वमेधशतंपुण्यंतस्मिंल्लिंगस्यदर्शनात्॥ जायतेनात्रसंदेहो
मत्संमेतन्मयोदितं॥ तपसाकिंसुतेनेहकायक्लेशकरेणवा॥ विहितंनतेसद्यः प्रयागेश्वर
दर्शनात्॥ हरउवाच॥ नारदस्यवचःश्रुत्वास्वायंभुवसुतोनृपः॥ प्रियव्रतोमहादेविमहाकालवनंनृप
दक्षप्रतिव्रतास्त्रिगंनवद्यास्त्रदक्षिणे॥ दर्शनात्तस्यलिंगस्यमत्समीपंसमागता॥ मयासन्मा
नितोदेविगणानामधिपःकृतः॥ येपश्यंतिनरानक्त्याप्रयागेश्वरमीश्वरं॥ तेधन्यामानुषेलो
केकिंपत्रेनिरर्थकाः॥ यागतियोगयुक्तस्यसुखस्थस्यमनीषिणः॥ सागतिर्जायतेसम्यक्
प्रयागेश्वरदर्शनात्॥ माघमासेसमेप्राप्तेतिप्रयागेश्वरदर्शनं॥ कर्तुयेमानुषास्तेषामश्वमेधः
पदेपदेएषतेकथितोदेविपत्रजावृ॥ पापनाशनः॥ प्रयागेश्वरदेवस्यशृणुसिद्धेश्वरंपरं॥ ॥ राम॥
इतिश्रीस्कंदपुराणेअवंतीखंडेप्रयागेश्वरमाहात्म्यं॥ ॥हरउवाच॥ एकोनषष्टिकंविद्धिदेवंसिद्धे ११६

श्वरंप्रिये॥ यस्यदर्शनमात्रेणसिद्धिःपुंसांप्रजायते॥ आसीदश्वशिरोनामराजापरमधार्मिकः॥
सोश्वमेधेनयज्ञेनइष्ट्वासबहुदक्षिणेः॥ स्नातस्यावभृथेकृष्णेजाह्नवीः परिवारितः॥ यावदास्ते
सराजर्षिस्तावत्सिद्धोतिदीप्तिवान्॥ नानौषधिपनावज्ञोमंत्रतंत्रविशारदः॥ आययौकपिलः
श्रीमान्गोवध्यस्यमिषाद्गृहं॥ तयोस्त्वरितमुत्थायसराजासागतःक्रियां॥ चकारपरयायुक्तो मुदा
युक्तोधिवीपतिः॥ तावद्विनावासनस्थोसुमाशीलोसुविद्वतः॥ महाजसामहाभागोमुमूक्षुर्मुनिपुंग
वः॥ विद्याविनयसंपन्नोब्रह्मण्यपरायणः॥ स्रष्टुंसंहर्तुमीशोरुद्रकल्पोपरोपरः॥ उदयादिससंका
शोविनतासुतसन्निभः॥ तेजोराशिसमायुक्तोदुर्निरीक्षोदृष्टयःकृतः॥ वेनपोनोपमुग्मप्राणोपत्सा
निवाद्यवः॥ सराजाप्रांजलिर्भूत्वाह्यमेतातरब्रवीत्॥ अश्वशिराउवाच॥ श्रुतंमयामुनिश्रेष्ठनात्मारंवाजनाः
दिनात्॥ धर्मेनदृष्टितोदृष्टोमुक्तिदोभवबंधनात्॥ मेस्मरंतुरुषीकेशंराणांकोटिजन्मदा॥ अ
मुंतंपुरुषंप्राप्तोतिकथंनप्रणमेश्वरं॥ समाराधयतेगत्रायंशक्राद्यास्त्रिदिवौकसः॥ वसंतिमुदिताः
सूर्यगदेवद्युतिसमन्विताः॥ जन्ममृत्युजरारोगदुःखानिविविधानिच॥ प्रसर्पंतिविनश्यंस
द्यःप्रसन्नेगरुडध्वजे॥ इतिश्रुत्वातस्यवचनेनप्रार्थितोनपत्नास्विनिःअवतुस्तंनृपंसंस्थासेधिवे।

॥ ज्ञानकोविदौ॥ कृष्णप्रोक्ततंराजंस्त्वया नारायणो धुना॥ त्रावां नारायणौ कौतु त्वत्सकाशं
गतोनृप॥ अश्वशिरा उ॥ नवतोजाह्मणौ सिद्धौतपसादाधकिल्विषौ। युवां नारायणौ
कस्मादितिवाक्यमुवाचसः॥ शंखचक्रगदापाणेपीतवासानजार्दनः। गरुडस्थोहृषीकेश
श्चकस्मसदृशानुवि॥ तस्यराज्ञोक्वःश्रुत्वासंसिद्धोयोगकोविदौ॥ दर्शयामासतुतौ
हिरूपंनारायणंवपुः॥ कपिलोमंत्रमाहात्म्यात्त्वयंविसुर्वचूवह। शंखचक्रगदापाणेः
पीतवासाश्चतत्क्षणात्॥ जेगीषव्यश्चगरुडस्तत्क्षणात्समजायत। ततःसमभवत्तत्ररा
जवेश्मनि कौतुकं॥ दृष्ट्वानारायणंदेवंगरुडस्थंसनातनं। आश्चर्यंतादृशंदृष्ट्वासरा जा
विस्मयान्वितः॥ उवाचसाम्यतांसिद्धौनायंविसुरथेदृशः॥ तस्यब्रह्मासमुत्पन्नोनाभिपंकज
मध्यतः॥ तस्माद्ब्रह्मणोरुद्रःसक्षिप्तःपरमेश्वरः॥ इतिराजवचःश्रुत्वातदातौसिद्धसत्तमौ। च
क्रतुःपरमांमायांयोगवायोसुमात्रिकौ। कपिलःपद्मनाभश्चपद्ममध्येप्रजापतिः॥ ब्रूत्व
स्वयमवाक्सहसायोगतत्परौ। जेगीषव्योथरुद्रश्चरासपेवाक्यवास्थितः॥ ददर्शमुद्द रामः
श्चर्यंसराजायोगमोहितः। कौतुकात्सतुवासंदधौतः कंपितकंधरः॥ नत्यंनवतिवि ११७

श्वेशोमपिषायोगिनांसदा॥ सर्वरूपीहरिःश्रीमान्सर्वगः सर्वदःस्मृतः॥ ततोवाक्यावसा
नेतुतस्मरा जश्चसंसदि॥ मशकामत्कुणायूकाव्रणंतापक्षिणोमृगाः॥ अश्वागावोद्विजाः
सिद्धा व्याघ्रागोमहिषास्तथा॥ अन्येपिपशवःकीटाग्रामारण्यास्सर्वशः॥ दृश्यंतेराजन
वनेकोटिशः पर्वतात्मजे॥ तद्दृष्ट्वाद्भुतसंजातेराजाविस्मयमानसः॥ यावच्चित्तयतेकिंमा
तावज्ज्ञातंनृपेण हि। जेगीषव्यस्यमोहात्मंकपिलस्यमहात्मनः॥ कृतांजलिपुटोभूत्वास्त
श्चशिरास्तदा॥ पप्रच्छवद्विजोनत्वा किमिदंसिद्धसत्तमैः॥ सामर्थ्यमीदृशंलब्धुंकस्माद्वित्
पसोद्भवात्॥ अद्यमेसफलोत्पत्तिरद्यमेसफलंश्रुतं॥ सफलामेमनोवृत्तिर्युवयोर्दर्शनेनवै
तस्मात्तच्चनश्रुत्वाकपिलोवाक्यमब्रवीत्॥ महाकालवनेराजन्विद्यतेलिंगमुत्तमं॥ ख्या
तिसिद्धेश्वरंनाम्नासिद्धैरभ्यर्चितंसदा॥ सोनाग्नेश्वरइत्येतुसोनाग्नारोगपदायकं॥ त्रिनाव
मस्यलिंगस्यपूजनात्सिद्धिरुत्तमा॥ जेगीषव्येनसिद्धेन मयावैनृपसत्तम॥ तस्माद्गच्छमहाबाहो
महाकालवनंप्रति॥ तत्रस्नात्वासमभ्यर्च्यसर्वेशंशंखचक्रगदाधरं। लिंगमूर्त्यन्वितंविद्धियत्रे सिद्धि
र्वदास्यति॥ संसिद्धाबहवस्तत्रसनकाद्यानरेश्वर। तस्मात्तच्चनश्रुत्वाकपिलस्यमहात्मनः

॥ जगामसहमातंगसराजाश्वशिरास्तदा॥ इहशंवेवतोसिद्धो सिद्धेश्वरसमीपतः॥ स्वल्पेखवहवःसि
द्धासिद्धनाथास्तथापरे॥ ज्ञात्वा सिद्धेश्वरंदेवंसिद्धसंघैः समन्वितं॥ लिंगमध्यस्थितंविप्रस्तुत्वा
सनृपसत्तमः॥ पूजयामासभावेनपरमेणसमाधिना॥ ततस्तुष्टमहादेवो वरंवरयसुव्रत॥ य
स्मेनिलषितंसर्वमहंदास्यामिनूपते॥ लिंगस्यवचनंश्रुत्वानृपेणोक्तंवचस्तदा॥ यदिमेसुप्रसन्नो
सिहिवृत्रघ्नो॥ यत्तेरूपंपरंनाथतद्दर्शयममाग्रतः॥ एतदर्थमहंदेवसदासन्नि
धितस्तदा॥ आजन्मनोजगन्नाथकदाचक्षुर्जनार्दनं॥ तदागच्छाम्यहंदेववरणंवरवरः॥
दीयमानंत्वयानाथंत्र्यंबकेसिद्धेश्वरक्षितौ॥ नृपस्यवचनंश्रुत्वा लिंगंनोक्तंवरानने॥ नमे वि
द्युःसुरगणानासुरानमहर्षयः॥ परंरूपंनृपश्रेष्ठ तस्मादहंलिंगतांगतः॥ मामात्मोक्त्वतमीशा
सामुनयोमंत्रवर्षिताः॥ नेवतेवाविजानंतिपरमार्थेनपार्थिव॥ यदेतद्दृश्यतेतेजो लिंग
रूपेणमामकं॥ एतदेवहिब्रह्माद्याध्यायंतित्रिदशास्तथा॥ अतोमेपरमंरूपंनहुकिंचिद्वरा
मोनवेत्ति॥ अनेकजन्मसंसिद्धायोगिनोमदनुग्रहात्॥ प्रविशंतितनुंमर्त्यंमुक्तासंसारबंध ११८
नैः॥ एवंहिब्रुवतस्तस्यसिद्धेशानृपेणहि॥ विश्वमूर्तस्यलिंगस्यतस्मिंल्लिंगेलयंगतः॥

अतोदेविमविख्यातंलिंगंसिद्धेश्वरं॥ येपश्यंतिनरास्तत्रतेषांसिद्धिश्वशाश्वती॥ अंजनंपादले
पंवपाटुकासिद्धिरेव॥ गुटिकाखड्गसिद्धिश्चमहासिद्धिसुदुर्लभा॥ दिव्योषधीरसासिद्धिमंत्रस्पर्शा
दवाप्तया॥ एतास्तुसिद्धयःप्रोक्ताअपरालब्धिमादपः॥ धर्मार्थकामसिद्धिश्चमोक्षसिद्धिरनुत्तमा
जायतेनात्रसंदेहोश्रीसिद्धेश्वरदर्शनात्॥ एषतेकथितोदेविप्रभावः पापनाशनः॥ सिद्धेश्वर
स्यदेवस्यमातंगेशमयोद्भवः॥ ॥इतिश्रीस्कंदपुराणेअवंतीखंडेसिद्धेश्वरमाहात्म्यं॥॥ हरउ॥
मातंगेश्वरमर्ज्जुनेषष्ठिसंख्याकमीश्वरं॥ विघ्नपापहरंदेविसर्वाभीष्टकरंसदा॥ सुमतिर्नाम
द्विजेवभूवद्वापरेयुगे॥ सत्यवादीसदादांतोवेदाध्ययनतत्परः॥ मातंगतस्यपुत्रोभूद्बाल्या
द्रुणगतांगतः॥ सबालंगर्दभंदेवितिष्ठंतंमातुरंतिके॥ दंडकाष्ठेनसहसाताडयामासवेपनात्
तंतुतीव्राहतंदृष्ट्वागर्दभीपुत्रदुःखिनी॥ उवाचमाशुचःपुत्रंवाडालोयंनवेद्विजः॥ ब्राह्मणेदारुणा
नास्तिमैत्रोब्राह्मणउच्यते॥ हतेनपापाकृतिरयंबालेनकुकृतेदया॥ स्वकीयांनजतेवायपरु
तिंमानवोसदा॥ एतच्छ्रुत्वामतंगस्यदारुणंगर्दभीवचः॥ दंडकाष्ठंपरित्यज्यरासभीसत्यनाशत

PAGE(S) MISSING
NOT AVAILABLE

FOLIO NO:-
119

॥ ब्रूहि रामनिकल्याणि मातामेयेन हर्षिता ॥ कथं मांवेत्सि चाण्डालं ब्राह्मण्यं येन मे मतं ॥
गर्ग्य उवाच ॥ नापितेनसमस्तेन ब्राह्मण्यं वृषलेन हि ॥ जातस्त्वमसि चाण्डालो ब्राह्मण्यं तेन
तेगतं ॥ एवमुक्तोमतंगस्तु पितरंवाक्यमब्रवीत् ॥ तातार्यश्रुतमेद्यजातोदंडापितेनवै ॥
गर्ग्यमाकथितंसर्वमकृतस्मात्रसेमहत्तपः ॥ एवमुक्तास्पितरंव्रतस्नेहनिश्चयः ॥ सगत्वाय
तनेरेणपमतप्यतमहत्तपः ॥ ततः संतापयामास विमुक्तस्तपसान्वितः ॥ तंतथातपसा युक्तमुवा
चहरिवाहनः ॥ मातंगतप्यशक्रस्त्वंनोगानुत्सृजमानुषान् ॥ वरंदद्मितेहंतुवृणीष्वयमी
ह्सि ॥ मातंगउवाच ॥ ब्राह्मण्यकामयेसोहमिदमारब्धवानहं ॥ देहिमेशाश्वतंशक्र वरएषवृतो
मया ॥ एतच्छ्रुत्वातुवचनंतमुवाचपुरंदरः ॥ ब्राह्मण्यंयावसेत्वंहिडाम्भमकृतात्मनिः ॥ नाशमे
ष्यसिडुर्बुद्धेतडुपारममाचिरं ॥ चाण्डालयोनौजातेननतत्प्राप्यकथंचन ॥ एवमुक्तोमतंगस्तंश
यतात्मायतव्रतः ॥ अतिष्ठदेकपादेनवर्षाणांशतसंख्यया ॥ तमुवाचवतनः शक्रः पुनरेवमहा रामा
यशाः ॥ ब्राह्मण्यंदुःकरंवीरमारुरुक्षासहस्रदृक् ॥ नहिशक्यंत्वयातुमवमविरान्नाशमेष्यसि १२०

॥ शृणुवाक्यममन्युत्वंब्राह्मणत्वंसुदुर्लभं ॥ एवमुक्तोमतंगस्तुसंशितात्मादृढव्रतः ॥ सहस्रमेकं
पादेनतस्थौनामवर्षतं ॥ तंदृष्ट्वापुनर्वाक्यमुवाचबलहाहरिः ॥ चाण्डालयोनौजातेननवा
प्स्यसेकथंचन ॥ अन्यंवरंवृणीष्वत्वंमाहृयातत्त्वपञ्चमं ॥ एवमुक्तोमतंगस्तुशंशोकपरायणः
त्यक्तस्थितोधर्मात्मातताप परमंतपः ॥ ततपंतमनिरुद्धंपुरंजयोहवासवः ॥ वरंवृणीष्व
रोदासवंवृतहितेरतः ॥ शक्रउवाच ॥ मातंगब्राह्मणत्वंहिविरुरुत्समिहदृश्यते ॥ ब्राह्मण्यंदुर्लभं
तममसतांपापशीलिनां ॥ ब्राह्मणेसर्ववृतानांयोगक्षेममसंमतं ॥ तदुत्सृजेहदुःप्रापंब्राह्मण्यम
कृतात्मभिः ॥ अन्यंवरंवृणीष्वत्वंनोयंहितवरः ॥ मातंगउवाच ॥ किंमांतुदसिदुःखार्तं मृतंमारयसेव
मां ॥ अनुशोचामियोलब्धाब्राह्मण्यंनानुपालयेत् ॥ ब्राह्मण्यंयहिदुःप्रापैर्विनिवर्णैः शतक्र
तो ॥ तपसावकथंलब्धंविश्वामित्रेणधीमता ॥ वीतहव्यस्यराजर्षेः श्रूयतेविप्रतांगतः ॥ तस्मान्न
पः करिष्यामि निर्देहोनिःपरिग्रहः ॥ अहिंसादमसंयुक्तः कथंनाहोविधास्यति ॥ देवनकृतमेतद्धि
यद्यहंमादृशोजनः ॥ एतामवस्थांसंप्राप्तोदेवयोगात्सुरंदर ॥ नूनंदेवनशक्नोतुपौरुषेणनिवर्तितुं ॥ यद्दृष्टपत्रवानेवंनलभेविपुलांश्रियं ॥ एवंगतेतुदेवेशसादुमईसिमेवरं ॥ यदितेहमनुग्राह्य

किंविधासुकृतंमम॥तदुपायंहिमेशंसकर्थंविशोध्यवामिवै॥ययाममाक्षयाकीर्त्तिर्भवेत्पापपुरं
दर॥कर्तुमर्हसितद्ब्रूहिशिरसात्वांप्रसादये॥इत्युक्तोदीर्घतपसागेनवामदेवोबलध्वजः॥कथयामास
संतुष्टोलिंगमाहात्म्यमुत्तमं॥नराकालवनेलिंगंस्थापितंब्रह्मणापुरा॥देवब्रह्मविधंदिव्यंश्रीसिद्धे
श्वरइतिस्मृतं॥तस्यदर्शनमात्रेणविशुद्धंममवाप्स्यसि॥वासवस्यवाक्यंनमतंगोगतवान्मुदा
महाकालवनेरम्यंसिद्धक्षेत्रमनोपरं॥ददर्शतत्रलिंगमशेषफलदायकं॥दृष्ट्वासंपूजयामास
पुष्पैर्नानाविधैस्तदा॥पूजितःपरयाभक्त्यामतंगोदेवसत्तमः॥अहोमहात्मन्नाग्नेयि
यत्त्वयातोषितोस्म्यहं॥मनसासर्वमुद्भूतंब्रह्माऽऽद्यंभुवनादिकं॥वरदोस्मिवराहाणांशापदोस्म
दात्मनां॥ब्राह्मणंमत्प्रसादात्त्वंप्राप्स्यसेनविशंकितं॥ततोसौविप्रतांजातोमतंगोलिंगदर्श
नात्॥पुनःपूजाप्रभावेनब्रह्मलोकंगतोद्विजः॥ब्राह्मणैरुत्सवोलब्धोलिंगस्यास्यप्रभावतः॥
निर्मर्यादानिराचारानिःशंकाश्चातिलोलुपाः॥निर्घृणाःक्रूरकर्माणोधृष्टाकलियुगेनराः॥दृश्य रामः
नात्मलिंगमतेपापंतिविष्टपं॥येविमुढामहाभागाध्यानिनोमुक्तिगामिनः॥तेपश्यंतिकल्पोदे १२१
विमातंगेश्वरमीश्वरं॥ब्रह्मध्यानपरायेवयज्ञदानक्रियारताः॥तेपश्यंतिकल्पोदेविमातंगे

WELLCOME INSTITUTE LIBRARY

श्वरमीश्वरं॥ततःपुण्यानरामत्रेतिपांवासोक्तयो॥देविएतेकथितोदेविप्रभावःपापनाशनः
मातंगेश्वरदेवस्यसृणुसोमाग्नमीश्वरं॥॥इतिश्रीस्कंदपुराणेऽवंतीखंडेमातंगेश्वरमाहात्म्ये
द्वउ॥एकषष्टितमंविद्धिसोमाग्नेश्वरमीश्वरं॥यस्यदर्शनमात्रेणसोमाग्नमतुलंलभेत्॥अथ
मेघाऋतेकल्पेराजानंरथवाहनः॥प्राग्ज्योतिषपुरेरम्येधर्मात्माकीर्त्तिरुत्तमः॥अनेकयज्ञक
र्त्ताज्ञःसंग्रामेषुपराजितः॥तस्यभार्याविशालाक्षीनाम्नामदनमंजरी॥काशीराजसुतावेवरू
पेणातीवशोभना॥दत्तासुशीलाधर्मिष्ठाभर्तृव्यापारकोविदा॥वृतःषष्ठीकलायुक्तासदाभ
र्तृहितेरता॥पूर्णेंदुवदनासोम्यासदामधुरभाषिणी॥पूर्वकर्मवशाद्दिवंजगामायमेतदा॥मा
नेष्टातस्यनृपतेर्मंत्रयोगकरासदा॥श्रोत्रोद्वेगकरंवाक्यंतस्याज्ञःकरोतिसा॥ददाहलोचने
राज्ञस्तस्यासंदर्शनंसदा॥मूर्छांप्राप्योत्पपातासौतस्यास्पर्शनभूपतिः॥तदाविलोकितोराजा
तयाप्रेम्णावरानने॥दस्यमानोतितीव्रेणक्रिनावाक्यमब्रवीत्॥घास्तेनाऽऽनयगोनार्यो
मादायविपिनेवने॥परित्यजासुनेत्रेविवार्यक्रूरंममा॥ततोनृपस्यक्रूरेणविवार्यमृग
वेक्षणः॥घास्तस्तत्याजतांस्त्रीमारोषसंदर्शनेवने॥सावत्सकावनेभूत्वाभक्षंतीवसुरुरुः

संस्मारतंमहीपालंतममन्यतदेवतं।स्वयंसावरुसर्वांगीतत्रसक्तात्ममानसा।निश्वा
सपरमानिन्येदिनशेषंतथानिशां।निःश्वसंतनवद्यांगीहाहेतिरुदतीमुहुः।।मंदमाग्पे
तिवात्मानंनिनिंदमदिरेक्षणा।नविहारेनवाहारेरमणीयेनातद्वने।नकंदरेषुशैलानांसा
बबंधतद्गतामतिं।।तत्कातेनवरारोहानिनिंदनिजयौवनं।।इनगाहंकथंजाताव्रतदेववशंग
ता।।कथंप्राप्तःसमेभर्त्तातादृशोनृपसत्तमः।।धन्योयमतिपुण्योयंयोयंयौवनगोचरः।।अ
नासामसतीनांवैरमिष्यतिनसंशयः।।अनिष्टाकस्यचित्कांताकांतःकस्याप्यदीप्सितः।प
रस्परानुरागाणांदंपतीनामतिर्दृढा।ममायंवल्लभोराजानाहंनृपवल्लभा।।परस्परानुरा
गोयंधन्यानामेवजायतेयद्यद्यस्यमहीपालोनमय्यासंगमेष्यति।तत्कामाग्निरवश्यंमां
क्षपयिष्यतिदुःसहः।।रमणीयमनूद्यत्रदुस्कोकिलनिनादितं।।हीनंदिवल्लभेनेवदह
त्यद्यमेवनं।इत्यंसामदनाविष्टाविलपंतीपुनःपुनः।।ददर्शतापसंतत्रत्रिकालज्ञंदृढव्रतं रामः
मेखलाजिनकोपीनदंडकाष्ठोपजीविनं।महाजटंमहाकायंमुक्तंमुनिपुंगवं।उदयादि १२२
त्यसंकाशंविनावपुषमद्युतीसंदृष्ट्वामहर्षेत्थायसाराज्ञीदीनमानसा।।विनयेनोपसंगम्य

णिपत्यानिंद्यवर्त्मत्वंवियोगकारणंराज्ञःपप्रच्छप्रणतासती।भगवन्कृशोराजासमुताहम
तिवल्लभा।नागिनीशत्रुसेनसमातुस्यातीववल्लभा।अश्ववाहनमंत्रेणनृपेणोढामहामुने
धर्मतोधर्मकल्पज्ञपतिसमेनतु।सा किमर्थंनवान्नीष्टाताहंतस्यनृपतेः।मत्तोतीव
ममानिष्टोनृपतिःसर्वदाविभो।।इनगाहंकथंजाताकृपणाकेनतापस।कथंनवतिवश्यो
मेभर्त्तानृपतिसत्तमः।।सौभाग्यंवकथंमेस्यादितिसंचिंत्यकथ्यतां।।तस्मात्तद्वचनंश्रुत्वा
मुनिःसंशितव्रतः।।ज्ञानेनकथयामासतस्यादौभाग्यकारणं।पाणिग्रहणकालेतुत्वग्रहः प
पौविलोकितः।भर्त्तातेनृपतेःपुत्रिग्रहमाप्यविलोकितः।।तेनतेवल्लभोराजानत्वन्नृपमव
ल्लभा।इतितस्यवचःश्रुत्वासाराज्ञीदीनमानसा।।पप्रच्छविनयोपेताभगवन्किंनमात्मकंधरा।।
भगवन्केनदानेनस्नानेननियमेनवा।।कर्मणाकेनसौभाग्यंपरमंहिकथंनवेत्।इतितस्य
वचःश्रुत्वासमुनिःसंशितव्रतः।।कथयामासमाहात्म्यंसौभाग्यंयेनलभ्यते।।महाकालवने
शुचिलिंगंसौभाग्यदायकं।तस्यदर्शनमात्रेणसौभाग्यंसुलभंभवेत्।इंद्राणीराधितंलिं
गंपुरासौभाग्यकारणात्।।सौभाग्यंपरमंलब्धंनशक्रोतिलब्धवान्।।तस्माद्गच्छमादे

शान्महाकालवनेगुप्ते॥ सौभाग्यंप्राप्तविवातत्रकांतेनसहदर्शनं॥ पुत्रोभवतिश्रुतिमानूतस्य
लिंगस्यदर्शनात्॥ इत्युक्तासातदातेनतापसेनवरानने॥ विधृतेपत्रतल्लिंगंमहाकालव
नेगतः॥ दर्शपूर्णयोपेतालिंगंसौभाग्यदायकं॥ दर्शनात्तस्यलिंगस्यराजासस्मारतांपि
यां॥ पप्रच्छजमदग्नेस्तुकगतामे प्रियाविभो॥ भक्षिताविविधैर्विघ्नैर्हिंस्रव्याघ्रनिशाचरैः॥
मयासक्तानृशंसेनतस्माद्देवद्रुनोयतः॥ एवंब्रुवाणोनृपतेः प्रसुप्तोजमदग्निना॥ ननक्षि
तासाभूपालसिंहव्याघ्रनिशाचरैः॥ सावाविसृज्यत्वरितत्वक्षकाचपतिव्रता॥ महाकाल
वनेराजन्मृगतासौभाग्यकाम्यया॥ भार्यारक्षामहीपालइतिनःश्रुतिरुत्तमा॥ भार्यायांर
क्षमाणायांप्रजाभवतिरक्षिता॥ आत्माहिजायतेतस्यांसारक्षातेनरेश्वर॥ धर्महानिस्थानु
दिनमनार्यस्यनवक्तृप॥ निसाक्रियायाविघ्नेशमवापिपतनायवा॥ पत्न्यानुकूलयाभाव्यं
यथाशीलेपिनन्नरैः॥ इतःशीलाद्गुणाभार्यापोषणीयानरेश्वर॥ इतितस्यवचःश्रुत्वासमा
यातोश्ववाहनः॥ महाकालवनेरम्यंददर्शस्वप्रियांतदा॥ सौभाग्यपालंकृतंसुद्रुजयंतीम
हेश्वरं॥ दृष्ट्वास्नेहेनसाविंगंप्रसुप्तांस्वप्नतांप्रियां॥ विरहेणात्वदीयेनमंतप्तोहंवरानने॥ अद्यमेस

फलंवहुजन्मवितंवसुजीवितंयत्संप्रश्नमिसुनगेकृतायेदिकृतस्त्वया॥ एवंदृष्ट्वातुहर्षेणसाद
र्शतदापतिं॥ उवाचतंप्रसादेनभूयोभूयोमुदान्विता॥ ततःसराजरत्नसापरिष्वज्याहनामि
नं॥ प्रियेप्रसन्नएवाहंभूयोभूयोब्रवीमिकिं॥ ततःसमागमेयातेपुत्रोजातोतिधार्मिकः॥
तस्यलिंगस्यमाहात्म्याद्भवानामेतिगीयते॥ सौभाग्यमतुलंतत्रध्वंतयादेवमहिमात्मजे॥
सौभाग्येश्वरसंज्ञंतुततःप्रभृतिभूतले॥ येपश्यंतिविशालाक्षिसौभाग्येश्वरमीश्वरं॥ तेषांकुले
नदौर्भाग्यजायतेपतिवित्तात्मजा॥ नविघ्नतिनदारिद्र्यंवियोगोनबंधुभिः॥ पुत्रमित्रकलत्राणां
लिंगस्यदर्शनान्नृप॥ सोपसर्गनियंतेषांयेपश्यंतिवरानने॥ सौभाग्येश्वरसंज्ञंतुनग्रहादिन
मंनवेत्॥ सर्वबाधाविनिर्मुक्तोधनधान्यसमन्वितः॥ मनुष्योजायतेदेविसौभाग्येश्वरदर्शना
त्॥ सप्तजन्मवलाकुरुसौभाग्यैकनिधिर्नवेत्॥ जायतेन्नृपतिर्लोकेसार्वभौमोवरानने॥ ना
पुत्रानाधनानारीनदीनानुद्युःखिता॥ जायतेऽनंगानेषुसौभाग्येश्वरदर्शनात्॥ नवैधव्यं
नव्याधिनकालमरणंप्रिये॥ नपुत्रनप्रजंदुःखंजायतेलिंगदर्शनात्॥ यथालक्ष्मीर्हरेर्नि
त्यासावित्रीब्रह्मणःस्मृता॥ रोहिणीचंद्रनाकेशचीशक्रस्यवरवर्णिनी॥ तथासाजायतेनारीसौ

नागेश्वरदर्शनात्॥ एषतेकथितोदेविप्रभावः पापनाशनः॥ सोनागेश्वरदेवस्यगुणरूपेश्वरं
प्रिये॥ ॥इतिश्रीस्कंदपुराणेअवंतीखंडेसोनागेश्वरमाहात्म्ये॥ ॥हरउ०॥ द्विषष्टिकंविज्ञानीहि
देवंरूपेश्वरंप्रिये॥ यस्यदर्शनमात्रेणरूपवान्जायतेनरः॥ पाद्मकल्पेमहादेविप्रोनामभू
हीपतिः॥ पद्मगर्भसमुद्भूतोबभूवातिपराक्रमी॥ पृथिव्यांश्वतुरंतायांज्ञातोधर्मरतोबली॥
सैकदाविन्मदाबाह्वःप्रजेतवलवाहनः॥ वनंजगामगृह्नंहयनागशतैर्वृतः॥ बिल्वार्कखदि
राक्षीर्णकित्यधवलसंकुले॥ मृगसिंहर्क्षतंघोरेअन्यश्वापिवनेचरे॥ तत्रवन्यमहत्सैन्यं
बलवाहनः॥ राजामृगयवेशेनवनमभ्यविशत्तदा॥ एकएवात्तमबलश्चतुरंगसमन्वितः॥ सव
नस्यांतमासाद्यमहदारण्यमासदत्॥ तत्राप्यतीत्यनृपतिर्ददर्शाश्रममुत्तमं॥ मनःप्रह्लादजन
नंदृष्ट्वांतमतीवस्वपुष्पितैःपादपैःकीर्णंश्रुतीवसुरवशाद्वलं॥ ततोगच्छन्महाबाह्वरेकोमासान्
विसृज्यतान्॥ नापश्यदाश्रमेतस्मिंस्तमृषिंशंसितव्रतं॥ उवासकंचिद्दिवसंवनेसेनादयान्वितः॥ श्रु
त्वाप्यंतंतथाशब्दंकन्याश्रीरिवरूपिणी॥ निश्चक्रामाश्रमान्तस्मान्नृपसत्कारधारिणी॥ सातंदृष्ट्वैव
राजानंपद्मगर्भसमुद्भवंआसनेनार्चयित्वाथपप्रच्छानामयंतदा॥ उवाचविस्मयमानेनकिंकार्य

रामः
१२४

क्रियतामिति॥ तामब्रवीन्ततोराजाकस्यांमध्यरन्नाषिणी॥ दृष्ट्वैवानवद्यांगीयथावत्प्रतिपूजि
ता॥ क्वगतोभगवान्नेतन्ममाचक्ष्वशोभने॥ एवमुक्तानसाकन्यातेनराज्ञातदाश्रमे॥ हसंती
प्रत्युवाचेदंवाक्यंसमधुराक्षरं॥ कन्याहंशृणुवीपालकोमारब्रह्मचारिणः॥ तपस्विनोधृति
मतोधर्मज्ञस्यमनस्विनः॥ सुतांकरुवंसमामेवंविद्धित्वंमनुजाधिप॥ करुवंहिपितरंमन्येपि
तरंत्वमुज्जानन्ती॥ तस्यास्तुवचनंश्रुत्वानृपेणोक्तंवरानने॥ सुयज्ञराजपुत्रीत्वंयथाकल्पा
णिभाषसे॥ भार्यामेनवसुश्रोणिब्रूहिकिंकरवाणितेतु॥ सुवर्णमणिवासांसिकुंडलेपरिहा
रिणे॥ आहरामित्वद्यार्हंभार्यामेनवशोभने॥ गांधर्वेणचमांनीरुविवाहेनवसुंदरि॥ विवाहा
नांहिरत्नोरुगांधर्वःश्रेष्ठउच्यते॥ नृपस्यवचनंश्रुत्वाकन्यावचनमब्रवीत्॥ सुरुरंतंसंपतीक्ष्य
स्वसमांतुसंप्रदास्यति॥ राजोवाच॥ इतिमत्वावरारोहेतज्जमानामनेदिते॥ त्वदर्थमास्थितं
विद्धित्वयामेपरुतंमनः॥ आत्मनोबंधुरात्मैवगतिरात्मैवचात्मनः॥ आत्मैवह्यात्मनोह्यात्मा
कर्तुमर्हसिधर्मतः॥ कंन्याउ०॥ यदिधर्मयथास्त्वेषायदिवात्मापरुर्मम॥ सत्यंमेप्रतिजानीहि
दत्तमात्मानमद्यमे॥ इतितस्यवचःश्रुत्वापरिणीतानृपेणहि॥ सगांधर्वेणविवाहनकामासक्त

पार्वति॥ कामितासानृपेणवयतोगंतुंसमुद्यतः॥ एतस्मिन्नंतरेदेविकृष्णवस्त्राश्रममन्वगात्
साकंन्यापितरंदृष्ट्वा कियानोपजगामतं॥ विज्ञायाथवर्तांविप्रोदिव्यज्ञानोमहातपाः॥ उवा
चपरमक्रुद्धस्तांकंन्याकाममोहितां॥ त्वयापिदुष्टेरहसिमामविज्ञाययत्कृतं॥ स्वयंस्वयंवरंमो
हात्तस्मात्कृष्णात्वविष्यति॥ अत्यर्थंतानिर्घृणादीनानिर्लज्जारूपवर्जिता॥ अयंतेनृपतिर्नन्वी
डष्टरूपोनविष्यति॥ इत्युक्तातत्कृणाज्ञातासाकंन्यारूपवर्जिता॥ कुरूपोनृपतिर्यातु॥ शा
पास्मदात्मनः॥ अथप्रसादयामासतांकंन्यापितरंतदा॥ बालानज्ञामूढाहंमन्मथेनप्रपी
डिता॥ अज्ञानाद्यत्कृतंपापंतातत्क्षंतुमर्हसि॥ स्वयंमहीपतिस्तात्रात्मशीलोमहाव्रतः॥ नवाहंप्रा
र्थितानेनमयासोप्रार्थितोनृपः॥ तस्मादनुग्रहंतातकर्तुमर्हसिसांप्रतं॥ इतितस्याःवचःश्रुत्वा
सविप्रोतेरूपाचिंतः॥ उवाचसांदुहितरंमाशोचास्मेवपुनःपुनः॥ नेवावागनृतंप्रोक्तंयावद्यस्मरा
म्यहं॥ दैवमत्रपरंमन्येधिक्कृष्णंधिक्पराक्रमं॥ अकार्यकारितोयेनबलादहमनेदृते॥ उ
पदेशंप्रदास्यामितत्क्षंकर्तुमिहार्हसि॥ महाकालवनेपुत्रिलिंगरूपप्रदायकं॥ पशुपेश्वरमप्र
र्वितुविद्यतेनीष्टदायकं॥ तत्रंगच्छबलायुक्तासहनत्राकृपेणहि॥ रूपंप्राप्स्यसिदुःप्रापंलिंगदर्शन

मात्रतः॥ इत्युक्तासातदाकंन्यासहनत्रागताप्रिये॥ महाकालवनेरम्येपुत्रलिंगमनुत्तमं॥ द
र्शंपरयानक्त्यासत्वराजानरोत्तमः॥ तत्क्षणाद्दिव्यदेहासारूपेणातिमनोहरा॥ दिव्यवस्त्रपरी
धानादिव्यालंकारभूषिता॥ सत्वराजातमाजीतः कंदर्पसदृशाकृतिः॥ रूपेणाप्रतिमोलोकेत
स्यलिंगस्यदर्शनात्॥ अतोलोकेषुविख्यातोदेवोरूपेश्वरःप्रिये॥ रूपदोधनदोत्यर्थंपुत्रदः
स्वर्गदस्तथा॥ सत्वराजास्वकंन्यानोराष्ट्रंसोत्मादिसंपुनः॥ प्रिययापरयासार्द्धंचक्रेराज्यमकं
टकं॥ राज्यंकृत्वागतस्वर्गंभार्यायासहपार्वति॥ ददीप्यमानोवपुषाद्वितीयइवनास्करः॥ विमा
नेनसुदीप्तेनवंद्यमानोदिवालये॥ दर्शनात्तस्यलिंगस्याप्रपदमनामयं॥ येपश्यंतिविशाला
क्षिदेवंरूपेश्वरंशिवं॥ तेरूपेणानहीयंतेयशसानकुलेनच॥ सदास्त्रीकरालिंगंनुक्तिमुक्तिफल
प्रदं॥ येपश्यंतिवरारोहेतेषांलोकासदाक्षयाः॥ येवंदंतिनरानित्यंदेवंरूपेश्वरंपरं॥ तेवंयायां
तियानेनममलोकंसनातनं॥ एवमुक्तोलोकेकुलंतेनाप्यलंकृतं॥ यःपूजयतिरूपेशंरूपा
सौभाग्यदायकं॥ यःपूजयतिदेवेशंप्रसंगादपिपार्वति॥ धनवान्रूपवान्सोपिराजानंचनिचूत
ले॥ एषतेकथितोदेविप्रभावःपापनाशनः॥ रूपेश्वरस्यदेवस्यधनुःसाहस्रकंशृणु॥ ॥इति

श्रीस्कंदपुराणेअवंतीखंडेरूपेश्वरमाहात्म्यं॥ ॥हरउ॥ धनुःसहस्रनामानमीश्वरंशरणंपार्व
ति॥त्रिषष्टिसंख्मकंदिव्यंदर्शनात्पापनाशनं॥विदूरथोनामनृपःख्यातकीर्तिरनूद्भुवि॥तस्य
पुत्रश्चपुंजातःसुनीतिसुमतिस्त्रियां॥एकदातुवनंयातोमृगयांसविदूरथः॥ददर्शगर्त्ततुमहद्भू मे
र्मुखमिवाद्भुतं॥तंदृष्ट्वाचिंतयामास किमेतदितिपार्थिवः॥पातालेविवरमन्येवाऽवानलसं
निभं॥चिंतयंश्चिंवतत्रामोददर्शविजनेवने॥ब्राह्मणंसुव्रतंनामतपस्विनमकल्मषं॥संतप्त
छनृपतिः किमेतदितितंद्विज॥ब्राह्मणउवाच॥दानवःसुमहावीर्योवसत्यत्रमहातलेऊ
र्जनोनामविख्यातोनित्यंतीवसुधामिमां॥तमजित्वाकथंराज्यंभोक्ष्यसेवसुधाधिप॥तेनवि
ध्वंसिताविप्रारात्रौनिस्त्रिंशपार्थिवः॥उपद्रुतास्तथादशाध्वस्तास्तथाश्रमाः॥अथायय
ौस्यंशबलीमुशलायुधः॥यदित्वंघातयस्येनंपातालांतरगोवरं॥ततस्तमस्त्रंवसुधापते
रवाप्स्यसि॥इतितस्यवचःश्रुत्वामंत्रयामासपार्थिवः॥मंत्रिभिःसहितोमोघंश्रुत्वामुशलम
द्विजे॥तंमंत्रंक्रियमाणंतुसूनुर्नासहमंत्रिभिः॥तस्यश्चवर्तिनींकंन्यांसुश्रावायतदावती॥ततः
कतिपयाद्देवतांकंन्यांतरलेक्षणां॥जहारोपवनाद्दैत्यःऊर्जनः स्वसखीहतां॥एतच्छ्रुत्वाम

MEMORIAL

हीपालःक्रोधपर्याविलेक्षणः॥उवाचपुत्रोजानेदंसकुंजेनोमहासुरः॥दृष्ट्वानूनंपुरागर्त्त
तत्रसंशयितेमयि॥कथितोकिंजमुख्येनमयादृष्टेनपुत्रके॥सहन्पतासोपहर्त्तासुदावत्यां
सुदुर्मतिः॥प्रस्थितोदृष्टपत्न्याथस्वसैन्यपरिवारितः॥तोसुतौतत्रसंप्राप्तौपातालेपितृशा
सनात्॥युयुधातेकुजंभेनस्वशक्त्यासेनयावृतौ॥ततःपरिघनिस्त्रिंशशक्तिशूलपरश्वधैः
बाणैश्चवितरंतेषांसैन्यंसुदारुणं॥ततोमायाबलवतातेनदैत्येनतत्क्षणात्॥अमोघेनथि
तेमिनमुशलेनवरानने॥हतंसैन्यंरणेबभ्रोराजपुत्रोमहाबलौ॥ततःश्रुत्वामहीपालोविव
र्णवदनोभवत्॥बभ्रुपुत्रःपरामार्त्तिंजगामगिरिपुत्रिके॥रुरोदबभ्रुध्यात्वंपुत्रस्तेहेनपा
र्थिव॥ततोविलपतस्तस्यसमाकंउयोमहामुनिः॥अनेकसृष्टिसंहारेदृष्टिकार्यपरांतरः॥उदि
त्वादित्यसंकाशःसप्तकल्पायुषोवशी॥आजगामनृपान्यासेविलपंतंददर्शसः॥राजानंवा
क्यामासत्रिकालज्ञोमहामुनिः॥मास्तुवत्वंमहीपालक्षत्रियोसिदृढव्रतः॥कशोकःकमहीं
पालोदुर्जयोलोकमोक्षवत्॥शोकंकापुरुषाचीर्णंत्यजत्वंराजसत्तम॥उद्यमंकुरुराजेंद्रकुंजेन
यातयिष्यसि॥नात्रुर्ध्वमहंदेवसपार्श्वेरक्षिणंतस्यते॥धनुःसहस्रतुल्यंचमुशलस्यनिवारणं

धनुःशास्यसिराजेंद्रकुजंभविनिपातनं॥धनुसहस्रदत्त्वैतत्करक्षितंयोधसत्तमैः॥लिंगंदेवासु
रैर्युद्धेसहस्राक्षेणतेवितं॥इंद्रेणधनुर्ध्वजंन्यस्यवैयेनयातितः॥तस्मात्कथनंश्रुत्वा सराजा
थविस्मयः॥जगामत्वरितोदेविमहाकालवनंशुभं॥ददर्शतत्रतल्लिंगंपूजयामासभक्तितः
तस्मात्तुष्टःसदादेवोददौदिव्यंधनुस्तथा॥धनुःसहस्रतुल्यंवैशुलस्यनिवारणं॥धनुर्लब्धातदा
राजाकृतार्थोधनुलीत्रवान्॥जगामधीरःपातालं तेनमार्गेनसत्वरं॥ततोऽपश्यन्महत्सत्व
कंपाथिवसत्तम॥येनपातालमखिलमाक्रीडास्त्रितांतरं॥ततोऽपश्यन्महाकायंकुजंभोदानवे
श्वरं॥आजगामातिकोपेनस्वसैन्यपरिवारितः॥ततोयुद्धमभूत्तस्यमहराज्ञोवरानने॥दिना
नित्रीणिसंयद्धोधितस्तेनदानवः॥ततःक्रोधपरीतात्मासुशलोमामधावत॥गंधर्वास्तस्य
याधर्वैःपूज्यमानस्तिष्ठति॥यावत्कृत्वातिसुशलंतावत्सायमुदावती॥पप्रच्छदेवंव्याजहरे
कस्यपुनःपुनः॥ततःसगत्वायुयुधेसुशलेनासुरेश्वरः॥यदासुशलपातालेधनुषानिष्प्रभीकृ
तः॥धनुर्ज्यघातशब्देनपतितोभूतलेतदा॥गतोविवस्वतंजोकंकुजंभोदानवेश्वरः॥ततोपतत्सु रामः
ष्पवृष्टिस्तस्योपरिमहीपतेः॥जयुर्गंधर्वपतयोदेवावाद्यानिसस्वनुः॥सचापिराजातंहत्वासु १२७

त्रंलब्धासुतांतथा॥मुदावतीसुदायुक्तोहर्षगद्गदनिस्वरः॥पुत्रार्थंसहितोदेविसुसंपूर्णमनोरथः
सांतपुरपरीवारः पुनरायाद्वाराणसीं॥मह्याकालवनेरम्येयत्रलिंगमनुत्तमं॥पूजयामासर
त्नैश्चवस्त्रैराभरणैस्तथा॥ततःसपूजितोदेवः शंकरेणपुनः पुनः॥अस्यलिंगस्यमाहात्मा
द्धनुषासंनृपेणवै॥कुजोभोपिहतोदेवोदेवविद्वेषकारकः॥धनुःसहस्रनामायमतःख्यां
तिंगमिष्यति॥नरायेपूजयिष्यंतिधनुःसाहस्रमीश्वरं॥यास्यंतिशत्रवस्तेषांक्षयंनैवा
त्रसंशयः॥अर्चितेदेवदेवेशेधनुःसहस्रकेशिवे॥अर्चितासर्वदेवास्युर्वरदासुर्नसंशयः
प्रातर्मध्येपराह्णेचधनुःसाहस्रकंशिवं॥येनमंतिनरानित्यंनतेनरकगामिनः॥तीर्थानां
वयथागंगारेवातायोधसत्तमः॥तथायंरुद्रकोदेवोनाम्नाधनुःसहस्रकः॥गंगादि
तत्रतीर्थानिविद्यंतेविविधानिवा॥सुरहस्यानिपुण्यानिसद्यः पापहराणिच॥तेषांफलं
विनिर्दिश्यंमयाशंपतिसुव्रत॥धनुःसहस्रकंनामसदाशत्रुक्षयंकरं॥एषतेकथितोदे
विप्रभावः पापनाशनः धनुःसहस्रदेवेशोदेवंपशुपतिंशृणु॥॥इतिश्रीस्कंदपुराणेत्र
वंतीखंडेधनुसहस्रमाहात्म्यं॥शृणुलंपशुपत्यारंभंतुःषष्टिकमीश्वरंयस्यदर्शनमात्र

णपशुर्योनिर्लभ्यते॥ पशुपालोमहादेविब्रूवन्वविश्रुतः॥राजापरमधर्मिष्ठः पशूनांपाल
नेरतः॥दिष्ट्याःसकाशाद्विश्वगतस्तोयनिर्धिर्धिया॥ददर्शैवंवपुरुषान्संवशाधान्यतः॥स्थितान्
एकास्त्रीपुरुषैशासान्नर्मतीवपुनःपुनः॥अथराजानयाविष्टोविसंज्ञःसमपद्यत॥संवीष्टि
तोदस्युभिस्तैस्तयानार्याविशेषतः॥तत्रोन्मत्तमयायंत्रआगत्यदृषसन्नभंसंवेष्टसंस्थि
तेसर्वैस्तैस्तारुणोमदीपतिः॥रुदंराज्ञिततेसर्वेएकीभूतास्तदस्यवः॥घातितापशुपाले
ननष्टतापुनरुत्थिता॥तस्मात्तांदुष्टतांज्ञात्वास्त्रैर्यंवट्टपतेवृधे॥तस्मैवट्टपतेर्दत्तोनां
त्रयोदशदस्यवः॥अमर्षोद्यतसर्वैरेकीभूतास्तदस्यवः॥घातितापशुपालेन स्वतोन्नवन्॥
तादृङ्नाडःखितोराजापशुपालोनवक्षणात्॥अथापश्यत्तदायांतंनारदंमुनिपुंगवं॥मुनि
पुत्रंतपोयुक्तंसपप्रच्छवृषत्सदा॥पशुपालउ॥भगवन्ब्रह्मपुत्राद्यमयादृष्टंतुकौतुकं॥अकस्मा
सुरुषापंचसमायाताभयावहा॥तेरहंवेष्टितोदुष्टैर्व्याकुलश्चकृतस्तदा॥मुष्टिभिर्हन्यमानो
दृष्ट्वस्तोजातोद्विजोगतः॥एतस्मिन्नंतरेस्त्रीमामुवाचपुनःपुनः॥हेनवमहाराजमावि
षादंकुरुपुत्रक॥प्रलीनामच्छरीरंतुकंप्यतेकापिशाबला॥पशुपालवचःश्रुत्वानारदोवाक्यम

ब्रवीत्॥येतयापुरुषादृष्टास्त्रियोनाजनाभृधे॥बुद्धिर्वीर्यंगतेपंचकार्येंद्रियाणिते॥भ्रमंतीया
वनारीसालयादृष्टपोत्तम॥मनोरूपेणसाबुद्धिर्भ्रमत्येवदिनस्त्रियः॥जिताजिताःसुरेणाज्ञ
स्मरणालोककर्तृणा॥सोपिक्रोधवशंनीतइंद्रियैर्विषयप्रियैः॥पितामहेनस्वयंज्ञात्वादेवोमहेश्वरः
इंद्रियैर्मोहितैर्नैवनभागःपरिकल्पितः॥महादेवोजगन्नाथस्तृष्टिसंहारकारकः॥इंद्रियैर्मोहितो
राजन्कोधंचक्रेसुदारुणं॥सुरविस्मृतयोयस्मात्क्रीडार्थंभुवनत्रयं॥तिर्यग्नागनिमित्तार्थंचक्रेसस्मं
धनुत्तरा॥कृत्तस्यसंदग्धनयनोमोहितोथदिवाकरः॥नरेनयनगस्यापिविद्धोयज्ञोमृगाकृतिः॥प
शवश्चकृतादेवामुनयोवेदपारगाः॥मनोरूपेणयाबुद्धिःसावातीवसुदुर्जया॥तस्माद्राजन्म
हाबाहोमाविषादंदृढाकुरु॥तस्यतद्वचनंश्रुत्वानारदस्यमहात्मनः॥पशुपालोमहादेविवृक्षं
समुपचक्रमे॥पशुपालउ॥कथंतेनभगवन्मुक्ताःदेवाःशक्रपुरोगमाः॥पशुनावाब्रह्मपश्रोतु
मिच्छामिकथ्यतां॥तस्यतद्वचनंश्रुत्वानारदःपुनरब्रवीत्॥पशुपतेपिंगतादेवाज्ञविनिर्मुनिभिः
महाब्रह्मागमयतःकृतभगताशरणागताः॥स्तुतिभिस्तोषितोदेवोनक्तानुग्रहकारकः॥उवा
चवचनंराजन्यत्करोमितुच्यतेदिवाऊचुः॥वेदशास्त्राणिवेज्ञानरहोनवेमाचनास्व

सुरा अति

॥ स्कंदपुराणे ब्रह्मखंडे महेश्वरखंडे ईश्वरागमवर्तः पशवः सर्वमयासार्धंविगम्यतां ॥ महाकालवनेद्वे
त्रे पशुभावविमोक्षकाख्यरूपतिर्वानिवितातोमोक्षमवाप्स्यथ ॥ भवतामनुकंपार्थंलोकानुग्रह
कारणात् लिंगस्वरूपीभविष्यामि नान्नापशुपतीश्वरः ॥ अथते त्रिदशासर्वेदृष्ट्वादेवंतमीश्वरं
पशुभावविमुक्तास्थगतास्तस्त्रिविष्टपं ब्रह्मापशुपतिंदृष्ट्वसन्नेनांतरात्मना ॥ येत्वापश्यंति
देवेशंनक्ष्यापरमयायुताः ॥ तेषांकुलेपशुत्वंवयेगताः पितरश्चनो ॥ स्वकैःकर्मविपाकैस्तु
षांमोक्षोनविष्यति ॥ अज्ञानाज्ञानतोवापियत्सार्पंक्रियतेनरैः ॥ तत्सापप्रलयंयाति तत्सदेवस
मुद्भवात् ॥ तेनरापशवोलोकेकिंतेषांजीवितेफलं ॥ येनदृष्टः पशुपतिः पशुयोनिविमोक्षकः
कौमारेयौवनेबाल्येवाद्धिक्येवृद्धाभिधे ॥ तत्सापंविलयंयातिदृष्ट्वापशुपतिंशिवं ॥ योयमा
सेतुसंज्ञेयेस्नापशुपतिमानवाः ॥ तेषांवैवरदोदेवस्तदानीमुत्करोभवेत् सूर्यग्रहेयथादत्तंकुरु
क्षेत्रेविशेषतः ॥ पात्रेदानंसुवर्णस्यद्वंद्वंप्रोक्तमव्ययं ॥ पौषमासेदिनेकेननराणांमाघेकृतथा ॥
तद्दर्शनेनदेवेशंनविष्यतिनसंशयः ॥ इत्युक्तानगवान्ब्रह्मब्रह्मलोकंगतोनृप ॥ कृतकृत्यःश्रीराम
ह्यात्मामुनीभिःसहा ॥ तस्मात्त्वमपिराजेंद्रयदिच्छसिपरांगतिं ॥ समाराधयतल्लिंगंपशु १२९

योनिविमोक्षकं ॥ महाकालवनंगत्वाईशेश्वरसदक्षिणे ॥ तत्रतत्रवनेश्रुत्वानारदस्यमहात्मनः
जगामपशुपालोपिमहाकालवनंप्रिये ॥ दर्शनात्तस्यलिंगस्यगतोसौपरमांगतिं ॥ एषतेकथितोदेविप्रभावः पापनाशनः ॥ पशुपतेब्रह्मसदेवस्यशृणुब्रह्मेश्वरंशिवं ॥ ॥ इतिश्रीस्कंदपुरा
णेब्रह्मखंडेपशुपतेश्वरमाहात्म्यं ॥ ॥ हरउ ॥ पंचषष्टिकसंख्याकंविद्धिब्रह्मेश्वरंप्रिये ॥ यस्यदर्शन
मात्रेणब्रह्मलोकेमहीयते ॥ पुलोमानामदेत्योमहाबलपराक्रमः ॥ पौलोम्यांसहस्रेण
पूज्यमानस्तिष्ठति ॥ आनर्चुस्तंपितृदेवंसुरशत्रिदशाइव ॥ सकदाचित्समत्तंतुदेत्यानामिदम
ब्रवीत् ॥ अद्यापिलोकपालानांत्रयाणांउज्वलंयशः ॥ शातक्रतवेनैशमयमस्यवरुणस्यच ॥ यदिना
मतपः किंमेतपसाजीवितेनवा ॥ सोहंविजेष्यामिसर्वानेवदिवौकसः ॥ सर्वरत्नैःपरिवृतः
पुलोमेबलवत्तरैः ॥ इत्युक्त्वागत्वादेवसागरंदैत्यसंवृतः ॥ तावच्छयानंसहसाह्यपश्यन्मधु
सूदनं ॥ शारदाभ्रसितानासोमध्येकालंयथाघनं ॥ तमालोक्यततोदैत्यानब्रुवंदनुजास्त्वदा ॥
अयंसदानवगिरिवज्रोदिमधुसूदनः ॥ कीर्तिकांताकुलोकोनोवैधर्मादशकोद्विषां ॥ दत्त
सीमंतिनीकांतपत्नवत्त्रीप्रनंजकाः ॥ यमस्मजयवधूवैधव्यदशकः परः ॥ गतशक्तःस्वपत्ने

वसर्वदाकुटिलाशय॥ इतव्यस्तरयाऽष्टः कांचितोऽर्शनगतः। इत्युक्तामहिदेवेऽपुलोमाति
रुषान्वितः॥ उशनावृषेणनावृदग्रेदृष्ट्वापितामहं॥ आयांतंदेवसेनानांसंग्रामसुर्जयं॥ अ
थबोधंगतः॥ चेर्षकेटन्नारिमहाबलः॥ ददर्शायेपुलोमंतुस्वसैन्यपरिवारितं॥ ऋभ्व संगरे
धीराब्रह्माणमिदमब्रवीत्॥ विस्मुरु॥ पुलोमस्यविनाशार्थंयुद्धायक्रियतामिति॥ अ सोलब्ध
वरोदित्यसहसामोविजिष्यतितस्माऋछत्वरायुक्तोमहाकालवनेशुभे॥ लिंगंदृष्ट्वासितत्रैव
सद्यकल्पोऽर्वपुरं॥ उत्तरेस्यवनेशस्यशिवशक्तिसमन्वितं॥ तस्यलिंगस्यमाहात्म्यंकुलेश्व
रस्यशाश्वतं॥ कुंडेश्वरकरस्यशंभुनाकारिनिरंतरं॥ तदानयनयत्नेबातुतेनायंवध्यतामिति
शतितस्यवचःश्रुत्वाब्रह्मालोकपितामहः॥ सजगामसुरूपेणयत्रलिंगमनुत्तमं॥ स्तुतिंचकार
सहसादृष्ट्वानत्वापितामहः॥ नमस्तेदिव्यरूपायनमस्तेब्रह्मरूपिणेनमोविषमवीर्यायनमो
विश्वक्रियात्मने॥ नमःपिंगकपर्दायनमःखंडेंदुधारिणे॥ नमःकनकवर्णायनमोवृषविना रामः
शिने॥ वंदेत्वांवृषभस्तंभारंसदाशत्रुविनाशनं॥ रणत्कनककेयूरप्रणद्धोद्धतमंडलं॥ वंदेत्वां॥ विद १३०
शाधक्षंविश्वाधक्षंमहेक्षणं॥ स्त्रीणांसंमारुःखोघंमुनिध्यानपरंसदा॥ वंदेत्वांसर्वदादेवदेव

संघातनाशनं॥ टंकपट्टिशशूलाघवृषखड्गगदाधरं॥ एवंस्तुतःसन्भगवान्लिंगरूपीमहेश्वरः॥ कि
मित्थंमुखपद्मेनब्रह्मन्नेलोककारणं॥ कितेनीषत्कराम्यद्यकिंददामिपितामहः॥ कस्मात्तो
षमुनिश्रेष्ठकस्मादात्मासिदर्शपते॥ इतिलिंगवचःश्रुत्वाकायतंब्रह्मणातदा॥ वृत्तांतंविस्तरात्स
र्वंलिंगेनोक्तंद्विजेये॥ जलंग्रहाणवागीशशस्त्रंजशत्रुवारणं॥ हनिष्यतित्वयैनंवपुलोमं
महासैन्यकं॥ इत्युक्तःसुरब्रह्मागतोयत्रजनार्दनः॥ जलेननेननान्देत्यान्पातयामासभूतले
सपुलोमामहादैत्यंविस्मारविषंतरंमनौ॥ ऋषोपिब्रह्मणासार्धंमाजगामकुशस्थलीं॥ ददर्शत
त्रतल्लिंगंनामत्वंकेजनार्दनः॥ ब्रह्मणासंस्कृतोदेवोममानुग्रहकारणात्॥ तस्माब्रह्मेश्वरोनाम
ख्यातिलोकेषुयास्यति॥ येदृक्षंतिनरानन्त्यादेवंब्रह्मेश्वरंशिवं॥ तेब्रह्मलोकमाक्रम्यसमेष्यंति
ममांतिकं॥ यत्रकृपशोःप्रसंगेनदेवंब्रह्मेश्वरंशिवं॥ कृतकृत्यमपुरुषानशोचेन्मरणंसदा॥ याउ
ष्करंगनरोगत्वातपोवर्गशतंचरेत्॥ त्र्योब्रह्मेश्वरंपश्येत्तस्यपुण्यंपतताधिकं॥ पंचपातकसंयु
क्तोयोमर्त्याइष्टमानसः॥ सोपिरुद्रछिवंस्थानेदृष्ट्वाब्रह्मेश्वरंशिवं॥ चांद्रायणानांविधिवद्श॥
नामेवयत्फलं॥ तत्फलंसमवाप्नोतिब्रह्मेश्वरस्यदर्शनात्ऋत्वुक्तागतवान्विस्मुर्वृकंशाश्वतं।

प्रिये॥ ब्रह्मलोकंजगामाथब्रह्मालोकपितामहः॥ एषतेकथितोदेविप्रभावःपापनाशनः॥ब्रह्मेश्व
रसदेवस्यजल्पेश्वरमथश्रृणु॥ ॥इतिश्रीनागबन्धेस्कंदपुराणेत्र्यवंतीखंडेऽजल्पेश्वरमाहात्म्ये॥
हरउवाच॥ षट्षष्टितमंविद्धिदेवंजल्पेश्वरंप्रिये॥ यस्यदर्शनमात्रेणमहापापैःशमंव्रजेत्॥ जल्पेशा
ममहादेविराजासूनुर्विश्रुतः॥ सदाजल्परतोनित्यंजल्पवाक्प्रवर्तकः॥ विकत्थनश्चक्रनोनित्यं
सारगतिर्विचिंतकः॥ सुबाहुश्चमुरुवापंचपुत्राजाताःमहाबलाः॥ तेनराज्ञावरारोहेमृत्योःपंचत्वमा
योययौ॥ सुबाहुःशत्रुमर्दीचविजयोविजयएव॥ विक्रांतपंचमःपुत्रःसर्वशास्त्रार्थपारगः॥ पि
त्राजल्पेनतेराज्ञापृथुकुराज्येप्रतिष्ठिता॥ पृथुकूपित्राहितंसर्वंपृथुकदेशः॥ धर्मपालकताः॥ प्रस्थो
सुबाहुंनृपतियाम्यांवैशत्रुमर्दकः॥ पश्चिमायांतुयोराज्ञाउत्तरस्यांविजयोनृपः॥ मध्येविक्रांत
संज्ञस्तुस्वपादविनियोजितः॥ एवंत्वामीदृशीकृत्वात्वयमेवंवनंययौ॥ वचनंमंत्रिणस्तूष्णं
नहिवंशक्रमागताः॥ बुबुजुःस्वस्वराज्यानिमंत्रिभिःसहितास्तदा॥ विक्रांतस्यवयोमंत्रीविक्र
मैकपरायणः॥ तेनोक्तंविजनेदेविविक्रांतस्यमहीपतेः॥ हीनोद्यमानराज्ञेतुक्षत्रियास्यविशेषतः
तःतेहासास्पदतांयांतिहीनवीर्यादिनेदिने॥ तस्मान्नकुरुतेभ्रातराज्यलुब्धोयेकारणात॥ अ १३२

र्थवीर्यंतेनैवसंतोषंकुरुनेनृपः॥ क्रियतेदेहजोव्याधिर्हितमारण्यमौषधं॥ नूमिरेतौनिगि
रितसर्पौबिलशयानिव॥ राजानमविशेद्वाराज्ञाणंवाप्रवासिनं॥ मापयामोहितंसर्वंको
वाकस्यबांधवः॥ उद्यमःक्रियतांतस्माद्भ्रातृणांनिग्रहंप्रति॥ भ्रातानोभ्रातरंसर्वेनिहता
राज्यकारणात्॥ धर्मंवशाश्वतंज्ञात्वानिहतास्वासुरासुरैः॥ इतिमंत्रीवचःश्रुत्वाविक्रांतोवि
स्मयान्वितः॥ हसित्वाप्रत्युवाचेदंममायंशत्रुरागतः॥ विक्रांतउवाच॥ वयंवभ्रातरःपंचदृष्ट्वा
कामामहीपते॥ ब्रूतुत्वापृथुगत्वायंकथंराज्यंनविष्यति॥ ज्येष्ठभ्रातासुबाहुश्चद्वितीयःश
त्रुमर्दनः॥ जयश्चविजयश्चैवतेषांलघुरहंयतः॥ मंत्र्युवाच॥ राज्यस्थितःप्रजेद्यज्ञेज्ञप्रजा
हरणेवरे॥ कनिष्ठज्येष्ठताकार्याराज्यंप्राप्तंयतोवणे॥ तथेतिवचनंतस्यविक्रांतेनमहीभृता
समंत्रीकारयामासत्रिवारंविधिवद्दा॥ आथर्वणेनमंत्रेणपुरोधाःप्रत्यकारयत्॥ ज्ञातंपुरोहि
तेस्नेषांतत्रावृक्षःसमाहिताः॥ अथकृत्यासमुत्पन्नापश्चात्कृत्यावतुष्टयं॥ सपुरोहितभूपस्य
स्नानप्रसंगकेसमंततः॥ ततःसमस्तलोकस्यविस्मयश्चाभवन्महान्॥ यदेककालेनेमुत्रा
पृथक्पुरनिवासिनः॥ ततःश्रुत्वाचनिधनंपुत्राणांजल्पकोनृपः॥ वनेवसिष्ठपत्रकेमतंन

गवन्मन्त्रोतिना पिकथितंसर्वविसिष्ठेनमहात्मना ।दिव्यज्ञानेनदृष्टांतंविकल्पंविकल्पंवाकृ
रोन्नृपः ॥राजाउ॥ नोमेत्रोहंविनाशस्यधिक्धिक्जन्ममदीयकं।सार्द्धंत्वमात्मपुत्रैश्चमृतब्रा
ह्मणपंचकं।। मंत्रोत्पकः पायतरोन्नविष्यतिमदान्नुवि॥यदिजन्ममदीयंस्यान्नजातुभूम
तले।ततस्तेनविनश्येयुःममपुत्रपुरोहिता॥धिक्करांधिक्मेजन्मनूनुजांवमहीतले।का
रणत्वंगतोयोहंविनाशस्यद्विजन्मनां।कुर्वतःस्वामिनस्तेयंपुत्राणांममयाजक।नाशंय
नुदुष्टास्तेदुष्टोहंनाशकारणं। इत्थमुद्विग्नहृदयःसजल्पःपृथिवीपतिः।पप्रच्छवसुनःपुरो
वसिष्ठंज्ञानिनांवरं॥॥राजोवाच॥भगवन्ब्रूहिमेतीर्थमवियोगकरंसदा।मद्यःपापहरंविप्र
लिंगंवाकथयप्रभो॥तस्यतद्वचनंश्रुत्वाजल्पस्पष्टंथिवीपतेः॥वसिष्ठःकथयामासदिव्यज्ञा
नेनपार्थिव॥गच्छजल्पमहादेशान्महाकालवनोत्तमं।स्नात्वानिःक्षत्रियांष्टद्धिरामस्तत्रप्र
पस्यति॥तत्रलिंगमनाद्यंवैकुंडेश्वरपश्चिमे॥तदाराधयराजेंद्रजामदग्न्याश्रमेस्थितः॥वसि
ष्ठस्यवचःश्रुत्वाजल्पोसौपृथिवीपतिः॥देवदारुवनंत्यक्त्वामहाकालवनंययौ॥ददर्शतत्रत गतः
ल्लिंगमनाद्यंदेवसंस्तुतं॥पूजयामासविधिवत्सरमेणसमाधिना॥तत्रवाणीसमुत्पन्नालिंग रामः
१३२

मध्यंवरानने॥नत्वंपापसमाचारोनत्वंमरणकारणं।पुत्राणांतृपविप्राणामदृष्टंतत्रकारणं।
विपाकेनस्वकीयेनगतावेवस्वतंपुरं।माशोकंकुरुराजेंपगहनाकर्मणोगतिः।।अनेनभू
तावेनतुष्टोदृष्टपसत्तम।यदन्नीप्सितंवरंब्रूहितत्तेदास्यामिनान्यथा॥राजाउ॥यदितुष्टोसिमेदे
वयदिदेयोवरोमम॥संसारसागरेघोरेमाभवेन्मम्जन्मवा।अक्षयादेहिमेकीर्तिमित्रान्
विश्रुतानुवि॥अथजल्पेश्वरोदेवोजल्पेनाराधितोनृवि॥वृंदंतुविद्दशासर्वेषमेकुर्लनोवरः॥
येर्त्वापश्यंतिमनुजामन्नाम्नाख्यातिमागतं॥तेषांवियोगोमानूयात्पुत्रतोधनतोप्रजा॥
नसंसारेनयंतेषांदस्तोनेवराजतः॥नत्वंतग्रहरोगेभ्योभयमस्तुकदाचन।शिवसन्निसदातेषां
येषांत्वंदर्शनंगतः॥तेधन्यामानुषेलोकेयेवतांशरणंगताः॥यावतीयात्रिपेकेरुयतुएंप्
राप्यतेनरैः॥तत्सर्वमधिकंदेवलभतेतवदर्शनात्।तावत्सतातिसंसारेघोरदुःखशताकुले
यावन्नदृश्यतेदेवःसंसारार्णवतारकः॥यदापापक्षयंपुंसांतदानिर्दर्शनंभवेत्।मदृतस्मृक
तेनैवनालंनतपसाप्रभो॥एवंब्रुविभतीत्युक्तातेनलिंगेनपार्थिव॥पश्यतांसर्वदेवानां
स्वतनोसंनिवेशितः॥तस्मिंल्लिंगेलयंप्राप्तेनृपेजल्पेवरानने।देवोजल्पेश्वरःख्यातोदेवैरुक्तो

महीतले ।मुक्तिदेमुक्तिदस्यैव सदानीश्वरस्थितः॥ एषतेकथितोदेविपुण्यावः पापनाश
नः ।जल्पेश्वरसदेवस्यस्मृणुकेदारसंज्ञकं॥ ॥इतिश्रीस्कंदपुराणेअवंतीखंडेजल्पेश्वरमाहा
त्म्ये॥ हरउ०॥ सप्तषष्टिकसंख्यांकंकेदारेश्वरसंज्ञकं। देवस्मृणुवरारोहदर्शनात्सापनाशनं॥
सृष्टिकालेपुरादेविदेवाव्याप्तंहिमंनहि॥ शीतार्त्तावि कलासर्वेब्रह्माणंशरणंगताः॥ हिमा
द्रिणाहितास्सर्वेवयंदेवजगत्पते॥ त्राहिनोनाम्यतुवक्त्रंपितामहनमोस्तुते॥ देवानांवचनं
श्रुत्वाब्रह्मणाप्रियेपीडितंहिमशैलेनशंकरस्यसुरेणहि। नाहंपातुंसमर्थोस्मि
सत्यमेतन्मयोदितंमहादेवमृतेवापिगतिरन्यानविद्यते। सएवशरणंदेवः सर्वेषांनोनविप्र
ति॥ तस्माच्छयामयासर्वेपावतारचितापुरा। कृतास्थितिर्विचित्रावैहिमाद्रियमयाकृतः॥ त्व
मसर्वज्ञेतिनामधृगुर्गमोगिरिः। हिमावत्सतथैवशास्तादेवोमहेश्वरः॥ तस्माद्या।
स्यामहंसर्वेकैलासंपर्वतोत्तमं॥ यत्रतिष्ठतिविश्वात्मादेवदेवोमहेश्वरः॥ एवमुक्तागतोब्र रागः
